
< प्रथमोऽङ्कः >



अभिज्ञानशाकुन्तलम्

(ABHIJÑĀNAŚĀKUNTALAM)

महाकर्म भरतस्य, न पूर्वे नापरे जनाः ।
दिवं मर्त्य इव हस्ताभ्यां, नोदापुः पञ्च मानवाः ॥ स्त॰ ४.५.१



डॉ. वेद प्रकाश शास्त्री

॥ श्रीः ॥

महाकविश्रीकालिदासप्रणीतम्

अभिज्ञानशाकुन्तलम्

प्रथमोऽङ्कः

या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

अन्वयः—या तनुः स्त्रष्टुः आद्या सृष्टिः, या विधिहुतं हविः वहति, या च होत्री ये द्वे कालं विधत्तः, (या) श्रुतिविषयगुणा, या विश्वं व्याप्य स्थिता, यां सर्वबीजप्रकृतिः इति आहुः, यया प्राणिनः प्राणवन्तः ताभिः प्रत्यक्षाभिः अष्टाभिः तनुभिः (उपलक्षितः) प्रसन्नः ईशः वः अवतु ॥ १ ॥

या सृष्टिरिति। या तनुः=मूर्तिः, स्त्रष्टुः=जगन्निर्माणकर्तुः, आद्या सृष्टिः= प्राथमिकनिर्माणम् (जलरूपेत्यर्थः), या मूर्तिः, विधिना=वैदिकेन विधानेन, हुतं=देवतोद्देशेनाग्नौ हवनीकृतम्, हविः=हवनीयद्रव्यम्, वहति=देवान् प्रापयितुं धारयति प्रापयति (अग्निमयीति भावः), या च तनुः, होत्री=हवनकर्त्री (यजमानरूपेत्यर्थः), ये द्वे मूर्त्ती, कालम्=अहोरात्रस्य (तत्परकतिथेश्च) प्रवर्त्तनात् सौरं चान्द्रञ्च मासर्त्तुवर्षादिरूपं समयं, विधत्तः=निष्पादयतः (सूर्यचन्द्ररूपे इत्यर्थः), श्रुतेः= श्रवणस्य, विषयः=शब्दः, स एव गुणो यस्याः सा श्रुतिविषयगुणा=आकाशमयी, या मूर्त्तिः, विश्वं= सकलं जगत्, व्याप्य=आवृत्य, स्थिता=विद्यमानाऽस्ति (नभोरूपेत्यर्थः), यां मूर्तिम्, सर्वबीजा-

भगवान् शिव की वह जलमयी मूर्ति जो विधाता की प्रथम सृष्टि है, वह अग्निरूपा मूर्ति जो विधिवत् हवन की गई सामग्री को तत्-तद् देवताओं तक पहुँचाती है, वह मूर्ति जो होत्री अर्थात् यजमान रूप में वैदिक विधानों का सम्पादन करती है, वे दो मूर्तियाँ जो सूर्य-चन्द्र रूप में पक्ष, मास, ऋतु आदि के द्वारा काल का विधान करती हैं, वह मूर्ति जो कर्णेन्द्रिय के विषय शब्दों के आश्रय आकाश के रूप में सर्वत्र व्याप्त है, वह मूर्त्ति जिसे विद्वान् सम्पूर्ण बीजों का उत्पादक कारण अर्थात् पृथ्वीरूपा प्रतिपादित करते हैं तथा वह मूर्ति जिससे सम्पूर्ण

May Īśa (Lord Śiva) protect you. Īśa, who is possessed of those eight visible forms, (to wet, viz water) which is 'the first creation of the creator, (viz fire), which carries the oblation offered according to injunction, (viz the priest) which performs the religious rites or sacrifice, those two (viz. the Sun and the Moon) which regulate time (viz ether or sky) which having the attribute of

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण। (नेपथ्याभिमुखमवलोक्य) आर्ये! यदि नेपथ्यविधानमवसितं तदिहागम्यताम्।

नटी—(प्रविश्य) अज्ज! इअह्मि। आणवेदु अज्जो को णिओओ अणुचिट्ठिअदुत्ति।

[आर्ये! इयमहमस्मि। आज्ञापयतु आर्यः को नियोगोऽनुष्ठीयतामिति।]

नाम्=सकलधान्यादिशस्यानां, प्रकृतिः=योनिः, अङ्कुराद्युत्पादने कारणम्, आहुः=ब्रुवन्ति (बुधा इति शेषः), (पृथ्वीरूपेति भावः), यया च मूर्त्या, प्राणिनः=शरीरिणः, प्राणवन्तः=जीवनवन्तः भवन्ति, ताभिः=पूर्वोक्ताभिः, प्रत्यक्षाभिः=प्रत्यक्षगोचरीभूताभिः, अष्टाभिः तनुभिः= मूर्त्तिभिः (उपलक्षितः), प्रसन्नः=सर्वत्र प्रकाशितस्वसामर्थ्यः, ईशः=महेश्वरः, वः=युष्मान्, अवतु=रक्षतु।

भावार्थः—महेश्वरंस्य या मूर्तिः जगन्निर्मातुः प्राथमिकनिर्माणमत एव जलरूपा, या मूर्तिः विधिवत् हवनीकृतं हवनीयद्रव्यं देवान् प्रापयति अत एव अग्निमयी, या च हवनकर्त्री अत एव यजमानरूपा, ये द्वे मूर्त्ती सौरं चान्द्रं च मासर्तुवर्षादिरूपं समयं विधत्तः—सूर्यचन्द्ररूपा, या श्रुतिविषयगुणरूपा—आकाशमयी, या च नभोरूपेण सकलं विश्वं व्याप्य स्थिता अस्ति, यां बुधाः सर्वबीजानां योनिः ब्रुवन्ति (पृथ्वीरूपेति भावः), यया च मूर्त्या प्राणिनः प्राणवन्तः भवन्ति (वायुरूपेण सर्वान् जीवनवन्तः करोति), ताभिः प्रत्यक्षगोचरीभूताभिः अष्टाभिः तनुभिः उपलक्षितः महेश्वरः युष्मान् रक्षतु॥ १॥

(नान्द्यन्ते=आशीः प्रतिपादनपरा देवस्तुतिर्नान्दी, तस्याः अन्ते=अवसाने)

सूत्रधारः—अलम्=पर्याप्तम्, अतिविस्तरेण=शब्दबाहुल्येन। (नेपथ्याभिमुखम्=यवनिका सम्मुखम्, अवलोक्य=दृष्ट्वा) आर्ये=प्रिये! यदि=चेत्, नेपथ्यविधानम्=पात्रादेः प्रसाधनादिकर्म, अवसितम्=सम्पन्नं, तत्, इह=अत्र रङ्गमञ्चे, आगम्यताम्=आगच्छताम्।

प्राणी जीवन प्राप्त करते हैं अर्थात् वायुरूप में जो मूर्ति सकल प्राणियों को जीवनदान देती है; इस प्रकार प्रत्यक्षतः दृश्यमान प्रसन्न भगवान् शिव की अष्टमूर्त्ति आप लोगों की रक्षा करें।

(विघ्नशान्त्यर्थ की जाने वाली ईश प्रार्थना (नान्दी) के पश्चात्)

सूत्रधार—बस, अब अधिक विस्तार करने की आवश्यकता नहीं। **(नेपथ्य की ओर देखकर)** आर्ये! नेपथ्यविधान (पात्रों का प्रसाधनादि कार्य) सम्पन्न हो चुका हो तो यहाँ आओ।

---

the object of hearing (i.e. sound), remains pervading the universe, (viz the earth) which the wise people call the source of all seeds, (viz the air) by which the living are endowed with life. (1)

(At the end of the benedication)

The Stage Director—Enough it is. Do not extend it more now. *(Looking towards the make up/tiring room)* Dear lady, if the make up (performance of your dressing etc.) is over, just come over here.

चतुरस्य कालीदासस्य ।

Of the clever kAlIdAsa

by: Kedar Naphade, ksn2@lehigh.edu

घोषितं कदाचित् भोजराज्ञा, यदि कोऽपि कविः मम दरबारे नूतनं काव्यं पठति तर्हि ददामि तस्मै लक्षरुप्यकाणि इति । श्रुत्वा एतद्, बहवः खलु आगताः कवयः दरबारे स्वकाव्यपठनं कर्तुं ।

(King Bhoj once proclaimed, "If any poet reads a new poem in my court , I shall give him One Lakh Rupees". Having heard this indeed many poets thronged the palace in order to read their poetry.)

परन्तु दरबारे अविद्यन्त केचन विद्वानाः ये कं अपि काव्यं प्रथमश्रुत्यनन्तरं एव सम्पूर्णतया पुनरोक्तुं शक्ताः । इतरे च द्वीतीयपठनानन्तरं पुनरुक्तवन्ताः । अन्ये तृतीयपठनात् पुनरुक्तवन्ताः ।

(However, in the court there were several scholars who could re-recite a poem completely just after having listened to it once. Then there were others who could re-recite it after they had heard it twice, and yet others who could do it after the third reading.)

अतः यदा कोऽपि कविः आगतवान्, स्वस्य नवकाव्यं च पठितवान्, केचन विद्वानाः अकथयन् न खलु नूतनं एतद् । पश्य, वयमपि एनं जानीमहे । ततः पुनरवदन् तद काव्यं । तदनन्तरं ये द्विपाठिनः अभवन् तेऽपि तदेव अकथयन् अवदन् च काव्यं । तदनन्तरं त्रिपाठिनः तथैव अकुर्वन् । अतः न कोऽपि कविः प्राप्नोतुं अशक्नोत् लक्षरुप्यकाणि ।

(So whenever any poet came and read his new poem, some scholars sad, this is not really new. see, we also know it. Then they recited the whole poem. then those who could remember things after they had heard it twice said the same thinf and recited the poem. Then those who remembered things after they had

heard them thrice did the same thing. Hence no poet was able to claim the lakh rupees.)

कालीदासाय न खलु अरुच्यत एतद् । कंचित् नवकविं सः स्वकक्षे आनीतवान् तं एतद् सुभाषितं च दत्तवान् र

(kAlIdAsa didnt really like this. He took one poet to his room, and gave him the following subhAshhita -)

स्वस्ति श्री भोजराजन् त्वमखिलभुवने धार्मिकः सत्यवक्ता // पित्रा ते संगृहीता नवनवतिमिता रत्नकोट्यो मदीयः । // तांस्त्वं देहीति राजन् सकलबुधजनैर्ज्ञायते सत्यं एतद् // नो वा जानन्ति यत्तन्ममकृतिमपि नो देहि लक्षं ततो मे ॥ //

(O King Bhoj, let there be good ! You are the (greatest) just and true-speaker in the whole world. 99 Crores of precious stones belonging to me were taken by your father. Give them back t me, O king .. all the scholars in your court know that this is true. If they do not, then they do not know my poem either. Then give me the lakh !)

दरबारे कविः तत् काव्यं अपठत् । न खलु वक्तुं अशक्नुवन् केऽपि विद्वानाः यत् जानन्ति तत् काव्यं इति । अतः अप्राप्नोत् कविः लक्षरुप्यकाणि । चतुरः खलु कालीदासः ।

(The poet read this poem in the court. None of the scholars were able to say that they knew this poetry . So the poet got one lakh rupees. kAlIdAsa was indeed clever !)

सूत्रधारः—आर्ये! इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषत्। अस्याञ्च कालिदासग्रथितवस्तुना नवेनाभिज्ञानशाकुन्तलनामधेयेन नाटकेनोपस्थातव्यमस्माभिः, तत्प्रतिपात्रमाधीयतां यत्नः।

नटी—(प्रविश्य=रङ्गशालायां प्रवेशं विधाय) आर्य्य!=प्रिय! (पूज्य!) इयमहम् अस्मि=आगतास्मि। आर्य्यः=पूज्यः (भवान्), आज्ञापयतु=निर्दिशतु माम् इति शेषः। कः=कतमः, नियोगः-निदेशः, (मया) अनुष्ठीयताम्=क्रियताम्।

सूत्रधारः—आर्य्ये=प्रिये! इयं हि, रसाः=शृङ्गारादयः, भावाः=प्रधानतः प्रतीयमाना रसाभिव्यञ्जकाः सञ्चारिभावाः, रत्यादि स्थायिभावाश्च, तेषां विशेषः=प्रकृष्टो भेदः, तस्य दीक्षागुरुः=प्रधानोपदेशकः (रसभावविषये प्रमुखरूपेण दीक्षागुरुः) तस्य, रसभावविशेषदीक्षागुरोः=रसभावविषयेषु प्रधानशिक्षकस्य, विक्रमे=पराक्रमे, आदित्यः=सूर्यः तद्रूपः, तस्य विक्रमादित्यस्य='विक्रमादित्य' इति प्रसिद्धाभिधेयस्य नरपतेः, अभिरूपाः=पण्डिता विद्वांस एव, भूयिष्ठाः=बहुतराः, यस्यां सा=विद्वद्बहुला, परिषत्=सभा (समुपस्थिताऽस्ति), अस्याञ्च=अत्र परिषदि, कालिदासेन=तन्नामकेन कविना, ग्रथितं=गुम्फितम्, यद् वस्तु= इतिवृत्तं, यत्र कालिदासग्रथितवस्तुना=कालिदासरचितवस्तुना, नवेन=नूतनेन, अभिज्ञानशाकुन्तलनामधेयेन='अभिज्ञानशाकुन्तलम्' नामकेन (अभिज्ञायते येन तदभिज्ञानं (अङ्गुरीयकं), तेन ज्ञाता शकुन्तला यत्र अभिज्ञानशाकुन्तलनामधेयेन), नाटकेन=दृश्यकाव्यविशेषेण, उपस्थातव्यम्=आराधनीयम्, अस्माभिः (नाटकस्याभिनयं विधाय रङ्गशालायामुपस्थितान् सभ्यान् सन्तोषयाम इति), तत्=तस्मात्, प्रतिपात्रं=प्रतिकुशीलवम् (प्रत्येकाभिनेतृविषये), यत्नः=अभिनयचारुतोत्पादाय विशेषेण आदरः, आधीयताम्=क्रियताम् (तेन सर्वैरभिनेतृभिः स्वस्वकर्मणि सावधानैर्यथा भवितव्यं तथा विधेयम्। अयमेव त्वां प्रति मे नियोग इति भावः)।

नटी—(**प्रवेशकर**) आर्य! यह मैं (सेवा में) उपस्थित हूँ। आप आज्ञा दीजिए, मैं आपके किस निर्देश का पालन करूँ।

सूत्रधार—आर्ये! शृङ्गारादि नवरस तथा भावों के दीक्षागुरु महाराज विक्रमादित्य की यह सभा प्रचुर विद्वानों से परिपूर्ण है। हमें महाकवि कालिदास की अभिनव कृति 'अभिज्ञानशाकुन्तल' नामक नाटक से इस सभा की सेवा (मनोरञ्जन) करनी चाहिए। इस उद्देश्य की पूर्ति के लिए तुम प्रत्येक पात्र को आदरपूर्वक समझा दो (अर्थात् जिससे हमारा उद्देश्य पूरा हो सके तुम सयत्न वह बात इस नाटक में भाग लेने वाले पात्रों को समझा दो)।

Actress—(Entering) Dear sir, here I am. Let your honour command what duty is to be executed ?

The Stage Director—Dear lady! This assembly of king Vikramāditya who is the teacher of all sentiments and emotions, is for the most part composed of learned people. Today we indeed have to offer a new drama—'Abhijñāna Śākuntalam' by name. The plot of which has been strung together by great poet Kālidāsa. Let therefore (your) effort be bestowed on every actor.

नटी—सुविदिदप्पओअदाए अज्जस्स ण किंपि परिहाइस्सदि। [**सुविदितप्रयोगतया आर्यस्य न किमपि परिहास्यते।**]

सूत्रधारः—(सस्मितम्) आर्ये! कथयामि ते भूतार्थम्—

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥ २॥

नटी—(सविनयम्) एवं णेदं। अणंतरकरणिज्जं दाणिं अज्जो आणवेदु। [**एवमेतत्। अनन्तरकरणीयमिदानीमार्य आज्ञापयतु।**]

नटी—सुविदितः=सम्यक् सम्पादितः, प्रयोगः=अभिनयव्यापारः, येन तस्य भावस्तया सुविदितप्रयोगतया, आर्यस्य=भवतः, किमपि=अभिनये कश्चिदपि प्रयोगः, न परिहास्यते=न स्खलितः भविष्यति (अत एव प्रतिपात्रं यत्नाधाने न किञ्चित्प्रयोजनम्)।

सूत्रधारः—(सस्मितम्=ईषद् हास्यं तेन सह यथा सस्मितम्), आर्ये=मान्ये! प्रिये! ते= तुभ्यम्, भूतार्थम्=सत्यविषयम्, कथयामि=भणामि।

अन्वयः—विदुषाम् आपरितोषात् प्रयोगविज्ञानं साधु न मन्ये। (कुतः) शिक्षितानां बलवदपि चेतः आत्मनि अप्रत्ययं भवति॥ २॥

आपरितोषादिति। विदुषां=पण्डितानाम्, आपरितोषात्=सन्तोषप्राप्तिपर्यन्तम्, प्रयोग-विज्ञानम्—प्रयोगस्य=आङ्गिक-वाचिकादिक्रियाकलापस्य, विज्ञानम्=विशिष्टज्ञानम्, साधु= उत्कृष्ट-मेव जातम्, इति तु न मन्ये=न स्वीकरोमि। (कुतः) बलवदपि=सुदृढमपि, शिक्षितानाम्= अभ्यासवतां, चेतः=मनः, आत्मनि=स्वस्मिन् विषये, अप्रत्ययम्=अविश्वसनीयं भवति॥ २॥

भावार्थः—विश्वेऽस्मिन् सुशिक्षिता अपि जना मदीयेयं शिक्षा उत्कृष्टैवेति निश्चेतुं न शक्नुवन्ति। मादृशानाम् अल्पज्ञानां कथा तु तत्र दूरतः परिहरणीयाः (त्वया प्रकटितोऽपि विश्वासो न मयि समुचित इति भावः)॥ २॥

नटी—अभिनय करने की कला से सुपरिचित होने के कारण हमारे पात्रों द्वारा इस अभिनव प्रयोग में भी आपका किसी प्रकार उपहास नहीं होगा।

सूत्रधार—(**मुस्कराकर**) आर्ये! मैं तुमसे सच कहता हूँ कि—

जब तक विद्वान् हमारे नाट्यकौशल से सन्तुष्ट न हो जायें तब तक मैं अपने 'मंचन' को सफल नहीं मान सकता। क्योंकि मैं इस कार्य को सुचारु रूप से कर लूँगा, ऐसी बलवती धारणा रहने पर भी शिक्षितों के सामने स्वयं अपने मन को विश्वास नहीं होता अर्थात् ये सन्तुष्ट होंगे या नहीं यह सन्देह बना ही रहता है॥ २॥

नटी—(**विनयपूर्वक**) आपका कथन सत्य है। अब इसके आगे जो करना है, बताइए।

Actress—By reason of your being well aquainted with this field, nothing at all will be ridiculous/funny.

The Director—*(With smile)* Lady! I tell you the truth.

I do not consider my knowledge of representation sound until it satisfies the learned; mind of even the highly educated person. I will be devoid of confidence till I gain their approval. (2)

सूत्रधारः—आर्ये ! किमन्यदस्याः परिषदः श्रुतिप्रमोदहेतोर्गीतात्करणीयमस्ति।

नटी—अध कदमं उण उदुं अधिकरिअ गाइस्सं। [**अथ कतमं पुनः ऋतुमधिकृत्य गास्यामि।**]

सूत्रधारः—आर्ये! नन्विममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम्। सम्प्रति हि—

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥ ३॥

नटी—(विनयेन सह यथा सविनयम्=विनयपूर्वकम्) एतत्=भवत्कथनम्, एवम्=इत्थम् (समीचीनमेव), अनन्तरकरणीयम्=परस्तात् यत्कर्त्तव्यम् (तत्सर्वमपि), आर्यः=भवान्, आज्ञापयतु=आदिशतु।

सूत्रधारः—आर्ये=मान्ये! अस्याः=पुरोवर्तिन्याः, परिषदः=सभायाः, श्रुतिप्रमोदहेतोः—श्रुतेः=श्रवणस्य, प्रमोदः=आमोदः, तस्य हेतुः=कारणं, तस्मात्=श्रवणसुखसम्पादकात्, गीतात्=गेयपदात्, अन्यत्= अपरम्, किम्=किं करणीयमस्ति ? न किमपीत्यर्थः।

नटी—अथेति प्रश्नार्थे, कतमं=कम्, ऋतुमधिकृत्य=आश्रित्य, गास्यामि=गानं विधाष्यामि।

सूत्रधारः—आर्ये=प्रिये! ननु इत्यनुनये, अचिरप्रवृत्तम्=सम्प्रति प्रस्तुतम्, उपभोगक्षमम्=सेवनार्हं, ग्रीष्मसमयमेव=ग्रीष्मर्तुमेव, तावदधिकृत्य=आश्रित्य, गीयताम्=गानं क्रियताम्। सम्प्रति हि=इदानीन्तु—

अन्वयः—दिवसाः सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः प्रच्छायसुलभनिद्राः परिणामरमणीयाः, वर्तन्ते इति शेष॥ ३॥

सुभगसलिलेति। सुभगः=अतिमनोहरः, सलिलेषु=जलेषु, अवगाहः=मज्जनं, येषु ते

सूत्रधार—आर्ये! गाने के अतिरिक्त इस सभा के कानों को सुख पहुँचाने वाला और क्या कार्य हो सकता है ?

नटी—तो फिर किस ऋतुपरक गीत को गाया जाय ?

सूत्रधार—आर्ये! इस समय विद्यमान ग्रीष्मऋतुपरक ही गीत गाओ, क्योंकि इस समय—

जल में स्नान करना अच्छा लगता है। पाटल पुष्प के संसर्ग से वन की वायु सुगन्धित

Actress—(Politily) It is so sir. Let your honour now command what is next to be done ?

Director—What else more than to please the ears of the audience.

Actress—Then concerning which season shall I sing ?

Director—Dear lady! you please sing just with reference to this very summer season. For at present—

The days on which a plung in water is pleasant, on which the breeze of the forest is fragrant owing to contact with Paṭala flowers,

नटी—तह [**तथा**]। (इति गायति)

ईषदीषच्चुंबिआइं भमरेहिं उह सुउमारकेसरसिहाइं।
ओदंसअंति दअमाणा पमदाओ सिरीसकुसुमाइं॥ ४॥
[ईषदीषच्चुम्बितानि भ्रमरैः पश्य सुकुमारकेसरशिखानि।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि॥]

सूत्रधारः—आर्ये! साधु गीतम्। अहो! रागापहृतचित्तवृत्तिरालिखित इव विभाति सर्वतो रङ्गः। तदिदानीं कतमं प्रयोगमाश्रित्यैनमाराधयामः।

सुभगसलिलावगाहाः, पाटलानां=तन्नामकपुष्पाणाम्, संसर्गेण=स्पर्शेन, सुरभिः=सुगन्धिः, वनवातः=काननपवनः, येषु ते पाटलसंसर्गसुरभिवनवाताः, प्रकृष्टा छाया यत्र तादृशे स्थाने, सुलभाः=अनायासलभ्याः, निद्राः येषु ते प्रच्छायसुलभनिद्राः, परिणामे=परिपाके, रमणीयाः=मनोहराः, दिवसाः अद्य वर्तन्ते, तम् (ग्रीष्मकालम्) अधिकृत्य गीयताम्॥ ३॥

नटी—तथा इति=तथैव करोमि।

अन्वयः—प्रमदाः दयमानाः सत्यः सुकुमारकेसरशिखानि भ्रमरैः ईषदीषच्चुम्बितानि शिरीषकुसुमानि अवतंसयन्ति॥ ४॥

ईषदीषदिति। प्रकृष्टो मदो यासां ताः प्रमदाः=मदविह्वलास्तरुण्यः, दयमानाः=सदयाः सत्यः, सुकुमाराः=कोमलाः, केसराणां=किञ्जल्कानां, शिखा येषां तानि सुकुमारकेसरशिखानि, ईषदीषत्=अनिर्भरं यथा स्यात्तथा, चुम्बितानि=स्पृष्टानि, ईषदीषच्चुम्बितानि, शिरीषकुसुमानि, अवतंसयन्ति=कर्णाभरणं कुर्वन्ति। काव्यलिङ्गमलङ्कारः, उद्गाथा जातिः॥ ४॥

सूत्रधारः—आर्ये=प्रिये! साधु गीतम्=शोभनं गानं समीचीनतया कृतम्, अहो! इत्याश्चर्ये, रङ्गः=रङ्गभूमिः, रागेण-गीतस्वेरण, अपहृता=बलादाकृष्य नीता, चित्तवृत्तिर्यस्य सः रागापहृत-

---

होकर बह रही है। घनी छाया वाले स्थानों में सुखद नींद आती है तथा इस ऋतु के दिवस का अन्त (सन्ध्याकाल) अतीव रमणीय लगता है॥ ३॥

नटी—जो आज्ञा। (**गाती है**)

भ्रमर-समूह ने धीरे-धीरे भलीभाँति जिसका रसपान कर लिया है ऐसे कोमल केसर युक्त गुच्छों वाले शिरीष के पुष्पों को यौवन-मद में चूर युवतियाँ सदयभाव से अपने कानों का आभूषण बना रही हैं॥ ४॥

सूत्रधार—आर्ये! आपने बहुत सुन्दर गीत गाया। (**आश्चर्य प्रकट करते हुए**) ओह!

---

on which sleep is easily induced in thickly shaded spots and which are charming towards their close.(3)

Actress—As you please. *(Sings)*

Young compassionate women use as ear ornaments (earings) the Śirīṣa flowers, which are only gently kissed by black bees and the tips of whose filaments are very delicate. (4)

Director—Well sung, dear lady. oh! The audience on all

नटी—णं पढमं ज्जेव अज्जेण आणत्तं अहिण्णाणसउंतलं णाम अउब्बं णाडअं अहिणीअदु त्ति। [**ननु प्रथममेव आर्येण आज्ञप्तमभिज्ञानशाकुन्तलं नाम अपूर्वं नाटकमभिनीयतामिति।**]

सूत्रधारः—आर्ये! सम्यगनुबोधितोऽस्मि। अस्मिन् क्षणे खलु विस्मृतं मयैतत्। कुतः—

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा॥ ५॥

(इति निष्क्रान्तौ)

इति प्रस्तावना।

चित्तवृत्तिः, (अत एव) सर्वतः=समन्ततः, अलिखितः=चित्रितः, इव, विभाति=शोभते (उत्प्रेक्षालङ्कारः)। तत्=तावत्, कतमं=कम्, प्रयोगम्=अभिनयम्, आश्रित्य= अवलम्ब्य, एनं=रङ्गं, आराधयामः=सेवामहे सन्तोषयामः इति यावत्।

नटी—ननु, प्रथममेव=पूर्वमेव, आर्येण=भवता, आज्ञप्तम्=निर्दिष्टम्, अभिज्ञानशाकुन्तलं नाम, अपूर्वम्=अभिनवम्, नाटकम् अभिनीयतामिति।

सूत्रधारः—आर्ये=प्रिये! सम्यगनुबोधितोऽस्मि=त्वया सम्यक् स्मारितः, अस्मिन् क्षणे= काले, खलु=निश्चयेन, विस्मृतं मयैतत्। कुतः—

अन्वयः—अतिरंहसा (अत एव) हारिणा सारङ्गेण एषः राजा दुष्यन्तः इव (हारिणा) तव गीतरागेण प्रसभं हृतः अस्मि।

तवास्मीति। अतिरंहसा=अतिशयवेगशालिना, अत एव, हारिणा=हर्तुं शीलमस्येति तेन= दूरमाकर्षतेत्यर्थः, सारङ्गेण=मृगेण, एषः=मृगयाशीलः, राजा दुष्यन्त इव, हारिणा= मनोहारिणा, तव

तुम्हारे राग ने सबका चित्त चुरा लिया है, अतः यह नाट्यसभा चित्रलिखित की भाँति दिखायी दे रही है। इस स्थिति में अब हम किस अभिनय द्वारा इस सभा को प्रसन्न करें?

नटी—आपने पहले ही निर्देश दिया था कि अभिज्ञानशाकुन्तल नामक अपूर्व नाटक का अभिनय किया जाय।

सूत्रधार—आर्ये! आपने ठीक याद दिलाया। इस समय मैं यह बात भूल ही गया था, क्योंकि—

---

sides appears as though painted (drawn) in a picture, due to the charm of your song (melody). Now then, having recourse to what drama shall we entertain it?

Actress—It is already ordered by your honour. A new drama "Abhijñāna Śākuntalaṁ" by name should be taken up for representation.

Director—Darling! I am well reminded. I have forgotten about it at this moment. How? I was forcibly carried away by the

(ततः प्रविशति रथारूढः सशरचापहस्तो मृगमनुसरन् राजा सूतश्च)

सूतः—(राजानं मृगञ्चावलोक्य) आयुष्मन्!

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्॥ ६॥

गीतरागेण=गानस्वरेण, प्रसभं=बलात्, हृतः=आकृष्टचित्तः, अस्मि। उपमालङ्कारः, पथ्यावक्त्रं वृत्तम्॥ ५॥

(इति निष्क्रान्तौ=नटीनटौ रङ्गशालातो निर्गतौ।)

इति प्रस्तावना।

(ततः=तदनन्तरम्, शरेण सह वर्तत इति सशरं=बाणयुक्तं, चापं=धनुः, हस्ते यस्य सः सशरचापहस्तः=धृतधनुर्बाणः, राजा=दुष्यन्तः, सूतः=तत्सारथिश्च, मृगं=हरिणम्, अनुसरन्=अनुधावन्, प्रविशति=नाट्यशालायामागच्छति।)

सूतः—(राजानं=दुष्यन्तं, मृगम्=हरिणञ्चावलोक्य) आयुष्मन्=प्रशस्तायुःशालिन्!

अन्वयः—कृष्णसारे अधिज्यकार्मुके त्वयि चक्षुर्ददत् मृगानुसारिणं साक्षात् पिनाकिनम् इव पश्यामि॥ ६॥

कृष्णसारे इति। कृष्णश्चासौ सारः तस्मिन् कृष्णसारे=पलायमाने कृष्णाख्यमृगविशेषे, ज्यां=गुणम्, अधिकृत्य वर्त्तत इति अधिज्यं, कार्मुकं=धनुः, यस्य तस्मिन् अधिज्यकार्मुके, त्वयि=

अतीव वेगपूर्वक दौड़ते हुए मृग द्वारा दूर पहुँचाये गये इन राजा दुष्यन्त की भाँति तुम्हारे चित्तहारी मधुर राग ने मेरे चित्त को कहीं दूर आकृष्ट कर लिया (पहुँचा दिया) था॥ ५॥

(दोनों रंगशाला से निकल जाते हैं।)

प्रस्तावना (आमुख) समाप्त।

(इसके पश्चात् रथ पर सवार हाथ में धनुष-बाण लिये राजा दुष्यन्त और सारथी मृग का पीछा करते हुए प्रविष्ट होते हैं।)

सूत—(राजा और मृग को देखकर) आयुष्मन्!

इस कृष्णसार मृग का शरसन्धान किये हुए आपको देखकर ऐसा प्रतीत होता है मानों साक्षात् भगवान् शङ्कर मृग का पीछा करते हुए जा रहे हों॥ ६॥

---

ravishing (abduction) melody of your song like king Duṣyanta here by a very swift (fleet) antelope.

(Exeunt)

Thus ends the prologue

(Then enter in a chariot the king, following a deer and holding a bow with fixed arrow on it in his hand and the charioteer)

Charioteer—*(Looking at the king and the deer)*

Long lived one! Casting my eye on the black deer and on you, whose bow is strung, I behold, as it were, Lord Śiva in person with the pināka (bow) following the deer. (6)

राजा—सूत! दूरममुना सारङ्गेण वयमाकृष्टाः। सोऽयमिदानीमपि—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ ७॥

दुष्यन्ते, (च=तुल्यकालताबोधनार्थे) चक्षुर्ददत्=अर्पयन् (अहम्), मृगमनुसरतीति तं मृगानुसारिणम्=मृगमुद्दिश्य अनुवर्त्तमानम्, (त्वां) साक्षात्=प्रत्यक्षं, पिनाकिनं=शिवम्, इव, पश्यामि=अवलोकयामि। उपमाऽलङ्कारः। पलायमाने कृष्णसारे शरसन्धानं कृत्वा अनुधावन्तं त्वाम् अहं मृगानुसारिणं प्रत्यक्षं शिवमिव पश्यामि (भावयामि)।

विशेषः—पुरा दक्षयज्ञे पतिनिन्दामसहमानाया भवान्या अग्नौ शरीरपातमाकर्ण्य वधार्थमागच्छन्तं कुपितं पिनाकिनं दृष्ट्वा दक्षयज्ञो गृहीतमृगस्वरूपः पलायामास। ततः पिनाकी तमनुसरन् शिरश्चिच्छेद॥ ६॥

राजा—सूत! अमुना=पुरोवर्त्तिना, सारङ्गेण=मृगेण, वयं—दूरमाकृष्टाः=आकृष्यानीताः। सोऽयं=सारङ्गः, इदानीमपि=दूरमाकृष्यापि, प्रयातीति भावः।

अन्वयः—अनुपतति स्यन्दने ग्रीवाभङ्गाभिरामं मुहुः बद्धदृष्टिः शरपतनभयात् भूयसा पश्चार्द्धेन पूर्वकायं प्रविष्टः इव अर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः शष्पैः कीर्णवर्त्मा उदग्रप्लुतत्वात् वियति बहुतरम् उर्व्यां स्तोकं प्रयाति॥ ७॥

ग्रीवाभङ्गेति। अनु=पश्चात्, पतति=धावति, स्यन्दने=रथे, ग्रीवायाः=कन्धरायाः, भङ्गेन=परावृत्त्या, अभिरामं=मनोहरं, ग्रीवाभङ्गाभिरामं, मुहुः=पुनः पुनः, बद्धा दृष्टिर्येन सः बद्धदृष्टिः=दत्तचक्षुः, शरस्य=बाणस्य, पतनभयात्=स्वशरीरे सञ्जातभयेन (हेतुना), भूयसा=बहुलेन,

---

राजा—सूत! यह मृग हमें बहुत दूर खींच लाया है। यह अब भी—

पीछे दौड़ते हुए रथ को (यह मृग) बार-बार गर्दन मोड़कर देखता है, बाण लगने के भय से अपने शरीर का पिछला भाग अपने शरीर के अगले भाग में समेट कर गोलाकार हो जाता है। थकावट तथा भय से मुख खुल जाने के कारण जिसके मुख से आधी चबायी हुयी घास के गिर जाने के कारण मार्ग भर गया है, (ऐसा यह) मृग चौकड़ी भरता हुआ ऐसा जान पड़ता है मानो (यह) आकाश में अधिकतर तथा पृथ्वी पर बहुत कम चल रहा हो॥ ७॥

King—Charioteer! we have been drawn far by this deer. Even now it—

Casting its glance on the chasing chariot in a very graceful manner turning his neck drawing to a great extent the back half portion into the forepart of his body through fear of the descent of the arrow and strewing his track with the half chewed grass dropping from his mouth opened through exhaustion, moves much more in the sky but a little on the earth, owing to his lofty boundings. (7)

(सविस्मयम्) कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तोऽयं मृगः।

सूतः—उद्घातिनी भूमिरिति रश्मिसंयमनात् रथस्य मन्दीभूतो वेगः; तेनैष मृगो विप्रकृष्टः संवृत्तः। सम्प्रति हि समदेशवर्त्ती, न ते दुरासदो भविष्यति।

राजा—तेन हि मुच्यन्तामभीषवः।

सूतः—यथाज्ञापयत्यायुष्मान्। (इति भूयो रथवेगं सूचयित्वा) आयुष्मन्! पश्य पश्य। एते हि—

पश्चार्द्धेन=देहस्य पश्चाद्भागेन, पूर्वभागम्=देहस्य पूर्वार्द्धभागम्, प्रविष्ट इव (इति गूढोत्प्रेक्षा), अर्द्धावलीढैः=अर्द्धचर्वितैः, श्रमविवृतमुख भ्रंशिभिः—श्रमेण=धावनरूपप्रयासेन, विवृतं=व्यात्तं, यन्मुखं तस्मात् भ्रंशिभिः=अधःपतद्भिः, शष्पैः=तृणैः, कीर्णं=व्याप्तं, वर्त्म=मार्गं यस्य सः कीर्णवर्त्मा, उदग्रम्=उच्चम्, प्लुतं=प्लवनं, यस्य सः तस्य भावस्तस्मात् उदग्रप्लुतत्वाद्=उत्कटोत्प्लवनात्, वियति=आकाशे, बहुतरम्= अधिकम्, उर्व्यां=भूमौ, स्तोकम्=अल्पम्, प्रयाति=गच्छतीतिं पश्य। स्वभावोक्तिरलङ्कारः। स्रग्धरा-वृत्तम्॥ ७॥

भावार्थः—अस्मत्स्यन्दनमुद्दिश्य शरपतनभयात् मण्डलीव भूत्वा धावन् मृगः स्वकीयोत्कटोत्प्लवनात् आकाशे अधिकं भूमौ तु अत्यल्पं गच्छन् इव प्रतिभाति॥ ७॥

(सविस्मयस्=साश्चर्यम्) अयं मृगः, अनुपततः=पश्चाद्धावतः एवः मे=मम, कथं, प्रयत्नेन= प्रयासेन, प्रेक्षणीयः=निरीक्षणीयः, संवृत्तः=सञ्जातः।

सूतः—उद्घातयति=पादस्खलनं जनयतीति, उद्घातिनी=पादस्खलनयोग्या, भूमिः=पृथ्वी (मार्गः), (इति हेतोः) रश्मीनां=प्रग्रहाणां, रथस्य=स्यन्दनस्य, मन्दीभूतः=अल्पीभूतः, वेगः= गतिः। तेन=हेतुना, एष मृगः=अयं हरिणः, विप्रकृष्टः=दूरवर्ती, संवृत्तः=सञ्जातः, सम्प्रति=इदानीं, समदेशवर्त्ती=समतलभूमिवर्ती (मृगः इति शेषः), अत एंव ते=तव, दुरासदः=दुर्लभः, न भविष्यति।

राजा—तेन हि=समतलप्रदेशवर्त्तित्वेन हेतुना, अभीषवः=प्रग्रहाः, मुच्यन्ताम्=शिथिलीक्रियन्ताम्।

(आश्चर्य के साथ) मैं इसका पीछा कर ही रहा हूँ कि देखते-ही-देखते यह दृष्टि से इतनी दूर पहुँच गया है कि कठिनाई से ही दिखायी पड़ता है।

सूत—यहाँ की भूमि ऊबड़-खाबड़ है। अतः बागडोर खिंची रहने से रथ की गति मन्द हो गई थी, इसीलिए यह मृग दूर निकल गया। अब रथ समतल भूमि पर आ पहुँचा है अतः अब इसका मिलना कठिन न होगा।

राजा—तो रास ढीली करो।

(With surprise) How then has he become visible to me with efforts, though I am closely following him.

Charioteer—Longlived one! I have restrained the speed of the chariot by drawing the reins as the ground was not equal. Therefore the deer there advanced to a very long distance. Now the chariot is on level ground, so it will not be difficult to get at by you.

मुक्तेषु रश्मिषु निरायतपूर्वकायः
स्वेषामपि प्रसरतां रजसामलङ्घ्याः।
निष्कम्पचामरशिखाश्च्युतकर्णभङ्गा
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते॥ ८॥

राजा—(सहर्षम्) नूनमतीत्य हरिणं हरयो वर्त्तन्ते। यतः—

सूतः—यथाऽऽज्ञापयत्यायुष्मान्=यथोपदिशति आयुष्मान्। (इति=एवं, भूयः=पुनः, रथस्य=स्यन्दनस्य, वेगं सूचयित्वा) आयुष्मन्! पश्य, पश्य।

अन्वयः—रश्मिषु मुक्तेषु निरायतपूर्वकायः तथा प्रसरतां स्वेषां रजसाम् अपि अलङ्घ्याः (तथा) निष्कम्पचामरशिखाश्च्युतकर्णभङ्गाः ते वाजिनः वर्त्मनि धावन्ति तरन्ति नु॥ ८॥

मुक्तेष्विति। रश्मिषु=प्रग्रहेषु, मुक्तेषु=शिथिलीकृतेषु, निरायतः=नितरां दीर्घः, पूर्वकायः=देहपूर्वभागः, येषान्ते निरायतपूर्वकायः, तथा, प्रसरतां=प्रचलताम्, स्वेषां=स्वखुरोत्थानाम्, रजसामपि=धूलिनामपि, अलङ्घ्याः=अनतिक्रमणीयाः, तथा निष्कम्पाः=निश्चलाः, चामराणाम्=शिरोलोम्नां, शिखाः=अग्रभागाः, येषान्ते निष्कम्पचामरशिखाः, (तथा) च्युताः=अपगताः, कर्णयोर्भङ्गाः=अवनतयः, येषान्ते च्युतकर्णभङ्गाः, ते=तव, वाजिनः=अश्वाः, वर्त्मनि=मार्गे, धावन्ति, नु=किम्, तरन्ति=आकाशे प्लवन्ते नु किम्। स्वभावोक्तिरलङ्कारः, वसन्ततिलकं वृत्तम् (प्रग्रहेषु शिथिलीकृतेषु त्वरमाणा अश्वाः एवं धावन्ति यथाऽऽकाशे प्लवन्ति)॥ ८॥

राजा—(सहर्षम्=सानन्दम्) नूनम्=निश्चयेन, हरयः=अश्वाः, हरिणं=लक्ष्यभूतमृगम्, अतीत्य=अतिक्रम्य वर्तन्ते।

सूत—जैसी आयुष्मान् की आज्ञा। **(इस प्रकार पुनः रथ का वेग दिखाकर)** आयुष्मान्! देखो-देखो ये घोड़े—

लगाम ढीली कर देने पर ये सुदीर्घ शरीर के पूर्वभाग वाले घोड़े अपने खुरों से उठी हुई धूल से आगे रहते हैं। इनके मस्तक की कलगी जरा भी नहीं हिलती और इनके कान भी निष्कम्प खड़े हुए हैं। यह सब देखकर ऐसा जान पड़ता है कि आपके घोड़े पृथ्वी पर नहीं आकाश में उड़ रहे हैं॥ ८॥

राजा—**(हर्षपूर्वक)** निःसन्देह हमारे घोड़ों ने हरिण को पछाड़ दिया है, क्योंकि—

King—Then loosen the reins.

Charioteer—As the longlived one commands. *(Acting the speed of the chariot)* Longlived one! look! look! The reins being loosened, these horses gallop along as if with impatience of the speed of the deer, with the forepart of their bodies fully stretched out, with the tips of their chowries quiverless, with thier ears steady and erect and becoming incapable of being over taken even by the dust raised by their own hooves. (8)

King—*(With joy)* Really our horses are outstripping the deer. For—

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्द्धा विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्॥ ९॥

सूतः—पश्यैनं व्यापाद्यम्।

(राजा शरसन्धानं नाटयति।)

(नेपथ्ये) भो भो राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

अन्वयः—रथजवात् यत् आलोके सूक्ष्मम् आसीत् तत् सहसा विपुलतां व्रजति। यद् अद्धा विच्छिन्नं तत् कृतसन्धानमिव भवति। यद् प्रकृत्या वक्रं तदपि समरेखं (भवति), मे नयनयोः क्षणमपि न दूरे न वा पार्श्वे (विद्यते)॥ ९॥

यदालोक इति। रथस्य=स्यन्दनस्य, जवः=वेगः, तस्मात् रथजवात्, यद्=वस्तु, आलोके=दूरादर्शने, सूक्ष्मम्=लघीयसी, आसीत्, तद्=वस्तु, सहसा=अकस्मादेव, विपुलताम्=विशालताम्, व्रजति=प्राप्नोति, यद्वस्तु, अद्धा=तत्त्वत एव, विच्छिन्नं=पार्थक्ययुक्तमासीत्, तद्वस्तु, कृतसन्धानमिव=कृतसन्धिवत्, भवति। यद्वस्तु, प्रकृत्या=स्वभावत एव, वक्रं=कुटिलमासीत्, तद्वस्तु अपि, समरेखं—समा रेखा=भोगः, यस्य तत्, भवति, (तथा) किञ्चिद् वस्तु, मे=मम, नयनयोः=नेत्रयोः, क्षणमपि=स्वल्पकालमपि, न दूरे, न वा पार्श्वे=सन्निधाने, विद्यते (इत्येवं प्रतिभाति)॥ ९॥

सूतः—सूतः=सारथिः, व्यापाद्यम्=वध्यम्, एनं=हरिणं, पश्य=अवलोकय।

(राजा=दुष्यन्तः, शरसन्धानं=चापे शरारोपम् (हरिणवधायेति भावः), नाटयति=चेष्टया प्रकटीकरोति।)

रथ के वेग से जो वस्तु पहले सूक्ष्म दीख पड़ती थी वही सहसा विशालकाय हो जाती है। जो वस्तु स्वभाव से ही पृथक्-पृथक् थी वह जुड़ी हुयी-सी दिखायी देती है। जो वस्तु स्वभावतः टेढ़ी है वह नेत्रों को सीधी दिखायी देती है। इस प्रकार कोई भी वस्तु मेरे पास या दूर नहीं रह जाती अर्थात् दूर की वस्तु निकट और निकट की वस्तु देखते-ही-देखते दूर हो जाती है॥ ९॥

सूत—इसे शिकार होता हुआ देखो (यह शिकार सामने है, इसे देखिए)।

(राजा धनुष पर बाण चढ़ाने का अभिनय करता है।)

(नेपथ्य में) हे राजन्! यह आश्रम का मृग है, इसे न मारिये, न मारिये।

The thing which appears minute (very small) to sight suddenly attains magnitude (great), which really is disjointed becomes as if united, even that thing which by nature is crooked, appears straight to my eyes, to me nothing even for a moment remains at a distance, nor at my side, by reason of the speed (velocity) of the chariot. (9)

Charioteer— Behold him being killed.

(The king acts—taking aim with an arrow)

सूतः—(आकर्ण्य अवलोक्य च) आयुष्मन्! अस्य खलु ते बाणपातपथवर्त्तिनः कृष्णसारस्यान्तरायौ तपस्विनौ संवृत्तौ।

राजा—(ससम्भ्रमम्) प्रगृह्यन्तामभीषवः।

सूत—यथाज्ञापयत्यायुष्मान्। (इति तथा करोति)

(ततः प्रविशति सशिष्यो वैखानसः)

वैखानसः—(हस्तमुद्यम्य) राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

(नेपथ्ये=यवनिकामध्ये) भो भो राजन्! इति न हन्तव्यो न हन्तव्य इति च सम्भ्रमे द्विर्वचनम्। आश्रममृग इत्यनेनात्र हिंसा सर्वथैवानुचिता इति।

सूतः—(आकर्ण्य=नेपथ्योत्थवाक्यं श्रुत्वा, अवलोक्य=शब्दाभिमुखं दृष्ट्वा च) आयुष्मन्! अस्य=पुरोवर्तिनः, ते=तव, बाणपातस्य पन्थाः बाणपातपथः, तत्र वर्त्तते इति बाणपातपथवर्ती तस्य बाणपातपथवर्त्तिनः, कृष्णसारस्य=मृगस्य (वधकार्ये), अन्तरायौ=मृगरक्षणाय बाणपातनिवारकत्वेन विघ्नभूतौ, तपस्विनौ, संवृत्तौ=उपस्थितौ।

राजा—(ससम्भ्रमम्=सत्वरम्, प्रगृह्यन्ताम्=समाकृष्यन्ताम्, अभीषवः=वाजिरज्जवः (रथः स्थाप्यतामिति भावः)।

सूतः—आयुष्मान्! यथाऽऽज्ञापयति=यथा आदिशति तथैव करोमि (इति तथा करोति, अभीषून् प्रगृह्य रथं स्थापयति)।

(ततः=तदनन्तरं, प्रविशति=रङ्गमञ्चे समायाति, सशिष्यः=शिष्येण सह वर्तमानः, वैखानसः=एतन्नामकः ऋषिः।

सूत—(**उक्त शब्द सुनकर तथा सामने देखकर**) आयुष्मन्! तुम्हारे बाण के निशाने के मार्ग में विद्यमान इस कृष्णसार मृग के सामने विघ्न रूप में दो तपस्वी आ उपस्थित हुए हैं अर्थात् तुम्हारे बाण और हरिण के मध्य तपस्वी अन्तराय (विघ्न) अथवा आड़ बनकर आ पहुँचे हैं।

राजा—(**विस्मयपूर्वक**) रास खींचो।

सूत—जैसी आयुष्मान् की आज्ञा। (**उसी प्रकार करता है, रास खींचता है**)

(**इसके बाद शिष्य के साथ वैखानस का प्रवेश**)

वैखानस—(**हाथ उठाकर**) राजन्! यह आश्रम का मृग है। इसे न मारिये, न मारिये।

(Behind the scenes) O' O' king! that is a deer belonging to the hermitage. He should not be killed. He should not be killed.

Charioteer—*(Hearing and observing)* Longlived one! hermits indeed have arrived intervening of the deer, who is with in the range of your arrow.

King—*(Hastily)* Seize the rein of the horses (to control with a bridle).

Charioteer—As instructs longlived one *(stops the chariot).*

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥ १०॥
तदाशु कृतसन्धानं प्रतिसंहर सायकम्।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि॥ ११॥

वैखानसः—(हस्तमुद्यम्य=हरिणवधवारणाय करमुन्नमय्य) राजन्! आश्रममृगोऽयं—अयं=एषः पुरोवर्ती, आश्रममृगः=आश्रमपाल्यमानः हरिणः अस्ति, (अत एव) न हन्तव्यो न हन्तव्यः—सम्भ्रमे द्विर्वचनम्।

अन्वयः—तूलराशौ अग्निरिव मृदुनि अस्मिन् मृगशरीरे अयं बाणः न खलु न खलु सन्निपात्यः बत। हरिणकानाम् अतिलोलं जीवितं क्व च निशितनिपाताः वज्रसाराः ते शराः च क्व?॥ १०॥

न खल्विति। तूलस्य राशिः, तस्मिन् तूलराशौ=कार्पाससमूहे, अग्निरिव=वह्निरिव, मुदुनि=सुकुमारे, अस्मिन् मृगशरीरे=हरिणदेहे, अयं बाणः=तव करस्थितशरः, न खलु न खलु सन्निपात्यः=नैव निक्षेप्यः। (बाणस्य न निक्षेपणे कारणं दर्शयति) बतेति खेदप्रकाशः, अल्पा हरिणा हरिणकास्तेषाम्=क्षुद्रमृगाणाम्, अतिलोलम्=अतीव चञ्चलम् (स्वल्पमात्रबाधया विनाशित्वात् इति भावः), जीवितं=जीवनम्, क्व च=कुत्र च वर्त्तते इति शेषः, निशिताः=तीक्ष्णाः, निपाताः=अग्रभागाः, येषान्ते निशितनिपाताः, वज्रस्येव-कुलिशवत्, सारः=बलं, येषान्ते वज्रसाराः =अतिकठिनाः, ते=तव, शराः=बाणाश्च क्व? महदन्तरमेतयोरिति भावः। अत्र अर्थान्तरन्यासो नामालङ्कारः, मालिनी नाम वृत्तम्॥ १०॥

भावार्थः—कार्पासव्यूहे अग्निरिव सुकुमारे अस्मिन् मृगशरीरे—अयं प्रखरशरः नैव निक्षेप्यः। क्षुद्रमृगाणाम् अतिलोलं जीवनं कुत्र च वर्त्तते। तीक्ष्णाग्रभागाः वज्रसाराः तव शराश्च क्व वर्तन्ते? (नखच्छेद्ये कुठाराघातवत्तस्मिंस्ते बाणप्रहरणमयुक्तमिति भावः।)॥ १०॥

रूई के ढेर पर अग्नि के समान इस मृग के कोमल शरीर पर यह बाण मत चलाइए। कहाँ तो मृगों का अत्यन्त चञ्चल (त्वरित नाशवान्) जीवन और कहाँ तीखे और वज्र के समान कठोर आपके बाण?॥ १०॥

इसलिए अब आप धनुष पर चढ़ाये हुए अपने बाण को शीघ्र ही उतार लीजिए,

---

(Then enters Vaikhānasa with his pupils)

Vaikhānasa—(Raising his hand) O' king! this dear belongs to the hermitage. He should not be killed. He should not be killed. Not indeed! not indeed! Should this arrow be made to descend upon the delicate body of this deer, like fire upon a heap of cotton! Where alas is the extremely frail (morally weak) life of poor deer and where your arrows of sharp points and adamantine strength! (10)

राजा—(सप्रणामम्) एष प्रतिसंहत एव (इति यथोक्तं करोति)।

वैखानसः—(सहर्षम्) सदृशमेवैतत् पुरुषवंशप्रदीपस्य भवतः।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवङ्गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥ १२॥

अन्वयः—तत् कृतसन्धानं सायकम् आशु प्रतिसंहर। (यतः) वः शस्त्रम् आर्त्तत्राणाय अनागसि प्रहर्त्तुं न॥ ११॥

तदाश्विति। तत्=तस्मात् कारणात्, आश्रममृगस्य वध्यमानत्वाभावादित्यर्थः, कृतं सन्धानं यस्य तं कृतसन्धानम्=मृगोपरि निक्षेपणाय विहितसन्धानम्, सायकम्=बाणम्, आशु=शीघ्रम्, प्रतिसंहर=प्रत्यावृत्त्य स्वं स्थानं प्रापय। (यतः) वः=युष्माकम्, शस्त्रं=बाणादि, आर्त्तानां=पीडितानां, त्राणाय=रक्षणाय (अस्ति), अनागसि=निरपराधे प्राणिनि, प्रहर्तुं न=प्रक्षेप्तुं न। अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। अर्थान्तरन्यास इति केचित्॥ ११॥

भावार्थः—तस्मात् आश्रममृगस्य वध्यमानत्वाभावात् कृतसन्धानं बाणं शीघ्रं प्रतिसंहर। यतः युष्माकं शस्त्रं पीडितानां रक्षणाय एव भवति न तु निरपराधे प्राणिनि प्रक्षेप्तुम्॥ ११॥

राजा—(सप्रणामम्=प्रणामपुरस्सरं) एषः=बाणः, प्रतिसंहृतः=निवर्त्तितः एव। (इति= एवमुक्त्वा, यथोक्तं करोति=बाणं तूणीरे निक्षिपति)

वैखानसः—(सहर्षम्) एतत्=बाणप्रतिसंहरणम्, पुरुवंशप्रदीपस्य=पुरुवंशप्रकाशकस्य, भवतः=दुष्यन्तस्य, सदृशमेव=सङ्गतं खलु।

अन्वयः—पुरोः वंशे यस्य जन्म तस्य तव इदं युक्तरूपम्। एवं गुणोपेतं चक्रवर्त्तिनं पुत्रमाप्नुहि॥ १२॥

जन्मेति। पुरोः=तदाख्यययातिनन्दनस्य राज्ञः, वंशे=अन्वये, यस्य=ते जन्म, तस्य, तव=ते,

---

क्योंकि आपका शस्त्र दुःखियों का दुःख दूर करने के लिए है न कि निरपराधों के वध के लिए॥ ११॥

राजा—(प्रणाम करते हुए) लीजिए, यह उतरा हुआ ही है। **(यह कहकर अपने कथनानुसार बाण उतार लेता है।)**

वैखानस—(प्रसन्नतापूर्वक) पुरुवंश के दीपक आपके लिए यह उचित ही है।

जिसका जन्म पुरु के वंश में हुआ है, उसके लिए ऐसा करना समीचीन ही है। (इस

Therefore withhold your arrow which has been well-aimed because your weapon is for the protection of the distressed and not to strike at the innocent. (11)

King—(With salutations) Here it is withdrawn *(does as said).*

Vaikhānasa—This is worthy of you who are the burning lamp of Puru's race.

This exceedingly becomes you, whose birth is in the dynasty

(इतरोऽपि हस्तमुद्यम्य) सर्वथा चक्रवर्त्तिनं पुत्रमाप्नुहि।

राजा—(सप्रणामम्) प्रतिगृहीतं ब्राह्मणवचः।

वैखानसः—राजन्! समिदाहरणाय प्रस्थिता वयम्। एष चास्मद्गुरोः कण्वस्य कुलपतेः साधिदैवत एव शकुन्तलया अनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्यातिपातस्तदत्र प्रविश्य प्रतिगृह्यतामतिथिसत्कारः। अपि च—

इदम्=बाणप्रतिसंहरणरूपम्, युक्तरूपम्=अतिशयेन युक्तम्। (इत्युक्त्वा आशीः प्रयच्छति) एवं गुणैः=दाक्षिण्यादिभिः, उपेतं=युक्तम्, चक्रवर्त्तिनं=सार्वभौमम्, पुत्रमाप्नुहि=लभस्व॥ १२॥

(इतरोऽपि=अन्यः सहागतः शिष्यः अपि, हस्तमुद्यम्य=हस्तमुत्थाप्य, आशीः प्रयच्छतीति शेषः।) सर्वथा=बाढम्, चक्रवर्त्तिनं=सार्वभौमं, पुत्रमाप्नुहि=लभस्व।

राजा—(सप्रणामम्=प्रणामपुरस्सरं) ब्राह्मणवचः=आशीर्वचनम्, प्रतिगृहीतम्=अङ्गीकृतम्।

वैखानसः—राजन्! समिधां=होमीयकाष्ठानाम्, आहरणाय=आनयनाय (संग्रहणाय), प्रस्थिताः=चलिताः, वयम्=तापसा इति शेषः। एषः=पुरो दृश्यमानः, अस्मद्गुरोः=अस्माकमुपाध्यायस्य, कुलपतेः=अयुतशिष्यपोषकस्य, कण्वस्य=तदाख्यमुनेः, शकुन्तलयैव=तदाख्यकण्वदुहित्रैव, साधिदैवतः=साधिष्ठातृजनः (शकुन्तलाधिष्ठित इत्यर्थः), आश्रमः=पर्णशालीया-

---

स्थिति में हमारा आशीर्वाद है कि—) तुम अपने ही समान गुणयुक्त चक्रवर्ती पुत्र प्राप्त करो॥ १२॥

(दूसरा शिष्य भी हाथ उठाकर आशीर्वाद देता है)—सर्वथा चक्रवर्त्ती पुत्र ही आप प्राप्त करें।

राजा—**(प्रणाम कर)** मैं ब्राह्मण के वचन (आशीर्वाद) को अङ्गीकार करता हूँ।

वैखानस—राजन्! हमलोग समिधा लाने के लिए आश्रम से निकले हैं। यह हमारे कुलपति महर्षि कण्व का आश्रम मालिनी नदी के तट पर दिखायी दे रहा है। इस समय वहाँ हमारी गुरुपुत्री शकुन्तला विद्यमान है। यदि आपके किसी अन्य कार्य में व्याघात न पहुँचता हो तो आप वहाँ जाकर आतिथ्य ग्रहण कीजिए। क्योंकि—

---

of king Puru. (May you) obtain a son, endowed with similar virtues, (who would be) an emperor of this universe. (12)

(Other also—raising his hand syas) Assuredly (utterly) (you would) obtain a son, who would be an emperor.

King—*(with a bow)* The words of a Brāhmana like you are accepted.

Vaikhānasa— O' king! we have set out to collect sacrificial sticks (wood). And this, on the bank of Mālinī river, is in truth, the religious domicile of the great sage Kanva. If no other work is interfered with, then enter and accept the rites of hospitality. And more over—

धर्म्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति॥ १३॥

राजा—अपि सन्निहितोऽत्र कुलपतिः ?

वैखानसः—इदानीमेव दुहितरं शकुन्तलामतिथिसत्कारायादिश्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः।

वासः, अनुमालिनीतीरं=मालिनीति नाम काचिन्नदी तस्याः तीरे, दृश्यते=अवलोक्यते (वर्तत इत्यर्थः)। अन्यकार्यातिपातः-अन्यस्य कार्यस्य, अतिपातः=अत्ययः, न चेत्=यदि न स्यात्, तत्= तदा, अत्र=आश्रमे, प्रविश्य, अतिथिसत्कारः=आतिथ्यम्, प्रतिगृह्यताम्=स्वीक्रियताम्। अपि च= किं च—

अन्वयः—धर्म्याः प्रतिहतविघ्नाः तपोधनानां क्रियाः समवलोक्य मौर्वीकिणाङ्कः मे भुजः कियद्रक्षति (इति त्वं) ज्ञास्यसि॥ १३॥

धर्म्या इति। धर्मादनपेता धर्म्याः=धर्मयुक्ताः, प्रतिहताः=अपसारिताः, विघ्नाः यासां तास्तथोक्ताः, तपो धनं येषां तेषां तपोधनानां=तपस्विनाम्, क्रियाः=यज्ञादिकार्याणि, समवलोक्य= सम्यग् अवेक्ष्य, मौर्व्याः=धनुर्गुणस्य, यः किणः=तच्चालनजनितचिह्नविशेषः, स एव अङ्कः=चिह्नं भूषणं वा, यत्र सः मौर्वीकिणाङ्कः, मे=मम (दुष्यन्तस्य), भुजः=बाहुः, कियद्रक्षति=किं परिमाणकं भयाद्रक्षति, (इति त्वं) ज्ञास्यसि॥ १३॥

भावार्थः—धर्मयुक्ताः अपसारितविघ्नाः तपस्विनां यज्ञादिकमवलोक्य मौर्वीकिणाङ्कः मे बाहुः किंपरिमाणकं भयाद्रक्षति इति त्वं ज्ञास्यसि॥ १३॥

राजा—अपि=इति प्रश्ने, अत्र=आश्रमे, कुलपतिः=महर्षिः कण्वः, सन्निहितः=वर्त्तते वा ?

वैखानसः—इदानीमेव=सम्प्रति हि, दुहितरं=पुत्रीं शकुन्तलाम्, अतिथिसत्काराय= अभ्यागतपूजायै, आदिश्य=आज्ञाप्य, अस्याः=शकुन्तलायाः, प्रतिकूलं=विपरीतं, दैवं=भाग्यं

वहाँ धर्मयुक्त निर्विघ्न सम्पादित होती हुई यज्ञादि क्रियाओं को देखकर आप यह जान सकेंगे कि धनुष की डोरी चढ़ाने से रगड़ खायी हुयी आपकी भुजा (किस प्रकार) कितने व्यक्तियों की रक्षा करती है ?॥ १३॥

राजा—क्या कुलपतिजी यहीं हैं ?

वैखानस—अभी-अभी अपनी कन्या शकुन्तला को अतिथिसत्कारार्थ आदेश देकर उसके प्रतिकूल दैव (भाग्य) की शान्ति के लिए सोमतीर्थ पर गये हैं।

Beholdig the pleasing rites of those whose wealth is their penance, performed without any hindrances, those will know how much they arm marked with the sear of the bow-string defends. (13)

King—Is the patriarch of the family or chancellor at home?

Vaikhānasa—Just now, having directed his daughter Śakuntalā to offer hospitality to guests, he has gone to Somatīrtha to pacify her bad-luck (adverse fate).

राजा—भवतु। तामेव द्रक्ष्यामि। सा खलु विदितभक्तिर्मां महर्षये निवेदयिष्यति।

वैखानसः—साधयामस्तावत्। (इति सशिष्यो निष्क्रान्तः)

राजा—सूत! नोदय अश्वान्। पुण्याश्रमदर्शनेनात्मानं पुनीमहे।

सूतः—यथाज्ञापयत्यायुष्मान्। (इति भूयो रथवेगं रूपयति)

राजा—(समन्तादवलोक्य) सूत! अकथितोऽपि ज्ञायत एवायमाभोगस्तपोवनस्य।

पूर्वजन्मकर्मदोषं वा, शमयितुम्=अनुष्ठानादिभिः शान्तिमानेतुं, सोमतीर्थं=तन्नामकपावनधाम, गतः= प्रस्थितः।

राजा—भवतु=आत्मसंवेदद्योतकम्, तामेव=शकुन्तलामेव, द्रक्ष्यामि=पश्यामि। सा= शकुन्तला, खलु=इति निश्चये, विदिता=अवगता, भक्तिः=अनुरागः, यया सा विदितभक्तिः, महर्षये= कण्वाय, मां=भक्तिमन्तं, निवेदयिष्यति (सा मम भक्तिं कण्वाय निवेदयिष्यतीति भावः)।

वैखानसः—तावत्=तदा, साधयामः=गच्छामः। (इति सशिष्यः=अन्तेवासिसहितः, निष्क्रान्तः=निर्गतः।)

राजा—सूत! नोदय=प्रेरय, अश्वान्, पुण्यः=पवित्रः, य आश्रमस्तस्य दर्शनेन आत्मानं, पुनीमहे=पवित्रीकुर्महे।

सूतः—यद्=यथा, आज्ञापयति=निर्दिशति, आयुष्मान्=भवान् (इति भूयः=पुनः, रथवेगं, रूपयति=सूचयति)।

राजा—(समन्ताद्=परितः, अवलोक्य=दृष्ट्वा) सूत! अकथितोऽपि=अनुक्तोऽपि, तपोवनस्य, अयमाभोगः=सीमा, परिपूर्णता, ज्ञायते एव=अनुमीयते खलु।

राजा—ठीक है, मैं उसी (शकुन्तला) को देखूँगा। वह निश्चय ही हमारी भक्ति देखकर महर्षि कण्व को हमारे सम्बन्ध में बता देगी।

वैखानस—तो अब हम चलते हैं। **(यह कहकर शिष्यों सहित चला जाता है।)**

राजा—सूत! घोड़ों को बढ़ाओ। इस पवित्र आश्रम के दर्शन से स्वयं को पवित्र करें।

सूत—जैसी आयुष्मान् की आज्ञा **(फिर अपने रथ का वेग दिखाता है)।**

राजा—**(चारों ओर देखकर)**—सूत! बिना कहे ही यह विदित हो जाता है कि यह समस्त तपोवन का ही क्षेत्र है।

King—Well, I shall see herself. She certainly will report me to sage Kaṇva as one whose devotion is known.

Vaikhānasa—Meanwhile we walk along. *(Exit with pupils)*

King—Charioteer! Drive on the horses. We shall purify overselves with the sight of this holy hermitage.

Charioteer—As the long-lived one commands *(Again acts the speed of the chariot).*

King—(Looking around) Charioteer! Though untold, it is indeed known that this is the extension of the penance grove.

सूतः—कथमिव ?

राजा—किं न पश्यति भवान् ? इह हि—

नीवाराः शुक-कोटरार्भक-मुख-भ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिःष्यन्दरेखाङ्किताः ॥ १४॥

सूतः—कथमिव ?=केन प्रकारेण ?

राजा—किं न पश्यति भवान् तपोवनस्याभोगानिति, हि=यस्मात्, इह=अत्र तपोवने—

अन्वयः—तरूणामधः शुककोटरार्भकमुखभ्रष्टाः नीवाराः (सन्ति), क्वचित् इङ्गुदीफलभिदः (अत एव) प्रस्निग्धाः एव उपलाः सूच्यन्ते, विश्वासोपगमात् अभिन्नगतयः मृगाः शब्दं सहन्ते, तोयाधारपथाः च वल्कलशिखानिष्यन्दरेखाङ्किताः दृश्यन्ते॥ १४॥

नीवारा इति। तरूणां=वृक्षाणाम्, अधः=तलप्रदेशे, शुकानां=तन्नामकपक्षिविशेषाणाम्, ये कोटरार्भकाः=तरुविवरस्थशुकशावकाः, तेषां मुखेभ्यः=चञ्चुपुटेभ्यः, भ्रष्टाः=विगलिताः, नीवाराः=तृणधान्यानि (दृश्यन्ते)। क्वचित्=कुत्रचित् अथवा कस्मिन्नपि भागे, इङ्गुदीनां=तापसतरूणाम्, फलानि भिन्दन्ति=विदारयन्तीति इङ्गुदीफलभिदः, अत एव, प्रस्निग्धाः=प्रकर्षेण चिक्कणा एव, उपलाः=प्रस्तराः, सूच्यन्ते=प्रकाश्यन्ते। विश्वासोपगमात्=मुनीनां वात्सल्यलाभात्, अभिन्ना=यथापूर्वमवस्थिता, गतिः=सञ्चारः, येषान्ते अभिन्नगतयः, मृगाः=हरिणाः, शब्दं=रथोत्थध्वनिं, सहन्ते=आकर्णयन्ति इति यावत् (शब्दमसहमाना न धावन्ति इति भावः), तथा तोयाधारपथाः=उटजाज्जलाशयगमनमार्गाः, च=समुच्चये, वल्कलानां=परिहिततरुत्वचां, शिखाः=अग्राणि,

---

सूत—कैसे ? (आप 'यह आश्रम है' यह किस आधार पर कह रहे हैं ?)

राजा—क्या आप नहीं देख रहे हैं कि यहाँ—

घोंसले में विद्यमान शुकशावकों के मुख से गिरे हुए नीवार धान्य के कण नीचे पड़े हैं। कहीं-कहीं इंगुदी के फल तोड़ने से चिकने बने हुए पत्थर दिखाई दे रहे हैं। मानव-साहचर्यजनित विश्वास के कारण यहाँ के मृग रथ की ध्वनि से विचलित नहीं हो रहे हैं तथा जलाशय की ओर जाने वाले मार्ग भीगे वल्कल के अग्रभाग से टपकने वाले जल से चिह्नित हो रहे हैं॥ १४॥

Charioteer—How you consider it as penance-grove?

King—Do you not see? For here are the grains of wild rice under the trees, fallen from the mouths of hollows with baby parrots inside, somewhere stones, excessively oily, are seen betrayed (to break) as crackers of Ingudi fruit; the fawn, whose gait is undisturbed owing to the acquisition of confidence, stand the sound of the chariot and the paths to water ponds are marked with lines of the dripping from the skirts of bark-garments. (14)

अपि च—

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन।
एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति॥ १५॥

तासां निःष्यन्देन=जलधारया, याः रेखास्ताभिरङ्किताः=चिह्निताः, दृश्यन्त इति शेषः। काव्यलिङ्गानुमानसमुच्चयस्वभावोक्तयोऽलङ्काराः। शार्दूलविक्रीडितं वृत्तम्॥ १४॥

भावार्थः—आश्रमसूचकचिह्नानि सूचयन् राजा कथयति—पश्य, वृक्षाणां तलप्रदेशे तरुकोटरस्थशुकशावकचञ्चुविगलिताः नीवाराः दृश्यन्ते। क्वचित् इङ्गुदीफलभिदः सुचिक्कणा उपला आश्रममेवायं इति प्रकाश्यन्ते। विश्वासोपगमात् यथापूर्वमवस्थिता मृगाः रथोत्थध्वनिमाकर्ण्य इतस्ततः न धावन्ति। च उटजाज्जलाशयगमनमार्गाः वल्कलशिखारेखाङ्किता दृश्यन्ते अत एव आश्रमप्रदेशोऽयं इति निश्चिनोमि॥ १४॥

अपि च=अन्यच्च—

अन्वयः—पवनचपलैः कुल्याम्भोभिः शाखिनः धौतमूलाः (सन्ति), आज्यधूमो-द्गमेन किसलयरुचां रागः भिन्नः, तथा एते हरिणशिशवः नष्टाशङ्काः छिन्नदर्भाङ्कुरायां उपवनभुवि अर्वाक् मन्द-मन्दं चरन्ति॥ १५॥

कुल्याम्भोभिरिति। पवनेन=वायुना, चपलैः=चलितैः, कुल्यानां=कृत्रिमसरिताम्, अम्भोभिः=जलैः, शाखिनः=तटस्थिताः वृक्षाः, धौतानि=क्षालितानि, मूलानि येषान्ते धौतमूलाः (भवन्ति), तथा, आज्यस्य=घृतस्य (वह्नौ हुतस्येति यावत्), धूमोद्गमेन=उद्भूतधूम्रेन (धूमसम्पर्केणेति भावः), किसलयरुचां=पल्लवदीप्तीनां, रागः=रक्तिमा, भिन्नः=भेदं गतः, वैपरीत्यं गत इति भावः। तथा च एते=दृश्यमानाः, हरिणशिशवः=मृगशावकाः (हरिणपोताश्च); नष्टाशङ्काः=निर्भीकाः सन्तः, छिन्नाः=तेषां भक्षणाय मुनिभिर्लूनाः, दर्भाणां=कुशानाम्, अङ्कुराः=अग्रभागाः, यस्य

और भी—

वायु के झोंकों से चञ्चल तरङ्गों द्वारा कृत्रिम नदी के जल से तटवर्ती वृक्षों की जड़े धुल गई हैं। यज्ञीय घृत के हवन से उत्पन्न धूप से नये पत्तों की लालिमा और ही प्रकार की हो गई है। जिस उपवन-भूमि से कुशा के अंकुर उखाड़ लिये गये हैं ऐसी उपवन-भूमि में ये हरिण के बच्चे निर्भीक भाव से धीरे-धीरे घास चर रहे हैं (ये सब लक्षण इस प्रदेश को तपोवन सिद्ध करते हैं)॥ १५॥

More over,

The trees have their roots washed by the water of artificial rivers rippling (small waves) in the wind; the hue of the lustre of tender leaves is diversified by the smoke of ghee (offered in the fire) rising up; and here, in front, on the garden-ground whose sprouts of darbha (sacred) grass are uprooted (cut down), leisurely graze (pasture) the young ones of deer, free from fear.

सूतः—सर्वमुपपन्नम्।

राजा—(स्तोकमन्तरं गत्वा) आश्रमोपरोधो माभूत्, तदिहैव रथं स्थापय, यावदवतरामि।

सूतः—धृताः प्रग्रहाः, अवतरत्वायुष्मान्।

राजा—(अवतीर्य्य आत्मानमवलोक्य च) सूत! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि, तदिमानि तावद् गृह्यन्तामाभरणानि धनुश्च। (इति सूतस्यार्पयति)

(सूतः गृह्णाति)

छिन्नदर्भाङ्कुरायाम्, उपवनभुवि=उद्यानभूमौ, अर्वाक्=अस्माकं सन्निधावेव (निकट एव), मन्द-मन्दं=शनैः-शनैः (स्वैरं), चरन्ति=पर्य्यटन्ति। काव्यलिङ्गानुमानसमुच्चयस्वभावोक्तयश्चा-लङ्काराः। मन्दाक्रान्ता नाम वृत्तम्॥ १५॥

भावार्थः—वायुप्रेरिततरङ्गैः कृत्रिमक्षुद्रसरितां जलैः तटस्थवृक्षाः धौतमूला इव प्रतिभान्ति। वह्नौ हुतहविषः, तज्जातधूमसम्पर्केण किसलयरुचां रागः वैपरीत्यं गतः। एते दृश्यमाना मृगपोताश्च नष्टशङ्का सन्तः च्छिन्नदर्भाङ्कुराणाम् उद्यानभूमौ अस्माकं निकट एव स्वेच्छया चरन्ति, अत एव निश्चिनोमि तपोवनप्रदेशोऽयमस्ति॥ १५॥

सूतः—सर्वं=कृत्स्नम् (यद् यद् भवतोक्तं तत् सर्वम्), उपपन्नम्=युक्तम् (तथावद् दृश्यत इति भावः)।

राजा—(स्तोकं=किञ्चित्, अन्तरं=तपोवनाभ्यन्तरं, गत्वा) आश्रमोपरोधः=रथप्रवेशेन आश्रमस्य पीडा, मा भूत्=न भवतु, तद्=तस्मात् कारणात्, रथं=स्यन्दनम्, इहैव=अत्रैव (आश्रमस्य किञ्चिद् दूर एव), स्थापय=स्थिरीकुरु, यावदवतरामि=रथाद् अवतरणं विधास्यामि।

सूतः—धृताः=गृहीताः, प्रग्रहाः=अश्वरज्जवः, आयुष्मान्=भवान्, अवतरतु=रथादवतरणं क्रियतामिति भावः।

राजा—(अवतीर्य आत्मानमवलोक्य च) सूत! विनीतवेषेण=अनुद्गताभरणेन (सात्त्विकवेषेण), तपोवनानि=मुन्यावासस्थलानि, प्रवेष्टव्यानि=आभ्यन्तरगम्यानि, तत्=तस्मात्

सूत—आपका कहना सही है।

राजा—**(कुछ आगे जाकर)** आश्रमवासियों को किसी प्रकार का कष्ट न हो अतः रथ यही रोक दो, जिससे मैं उतर जाऊँ।

सूत—मैंने लगाम खींच ली है अतः अब आप उतर जायें।

राजा—**(उतरकर तथा स्वयं को देखकर)** सारथी! तपोवन में विनीत वेश से प्रवेश

Charioteer—(What is told by you) All that is correct.

King—*(Going a short distance)* Let there be no inconvenience to the residents of the penance grove. Stop the chariot just here, so that I get down.

Charioteer— I have drawn the reins of the horses. Let the long-lived one alight.

King—*(Alighting)* Charioteer! Penance-groves or hermi-

राजा—यावदाश्रमवासिनः प्रत्यवेक्ष्य निवर्त्तिष्ये, तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः—यथाज्ञापयत्यायुष्मान्। (इति निष्क्रान्तः)

राजा—(परिक्रम्यावलोक्य च) इदमाश्रमपदं तावत् प्रविशामि। (प्रविश्य प्रवेष्टकेन निमित्तं सूचयित्वा) अये!

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥ १६॥

कारणात्, आभरणानि=अलङ्कराणि, धनुः=कार्मुकं च, गृह्यन्ताम्=आदीयन्ताम् (रक्ष्यन्ताम्)। (इति सूतस्यार्पयति=ददाति आभरणानि धनुश्च।) (सूतः, गृह्णाति=राज्ञ आभरणानि धनुश्च गृह्णाति।)

राजा—यावत्=यावता कालेन, आश्रमवासिनः=आश्रमस्थान् जनान्, प्रत्यवेक्ष्य=अवलोक्य, निवर्त्तिष्ये=प्रत्यागमिष्यामि, तावत्=तत्कालपर्यन्तम्, आर्द्राणि=सिक्तानि, पृष्ठानि येषां ते आर्द्रपृष्ठाः=जलसेचनेन विगतश्रमाः, क्रियन्ताम्, वाजिनः=अश्वाः।

सूतः—यथाऽऽज्ञापयत्यायुष्मान्=यथा भवन्तं रोचते तथैव करिष्यामि।

राजा—(परिक्रम्य=कियत्पदं चंक्रमणं विधाय, च=एवम्, अवलोक्य=परितः दृष्टिपातं कृत्वा) इदमाश्रमपदम्—आश्रम एव पदं=स्थानम्, इत्याश्रमपदम्, तावत्, प्रविशामि। (प्रविश्य=आभ्यन्तरभागे सञ्चर्य, प्रवेष्टकेन=दक्षिणेन बाहुना, निमित्तं=हेतुकम्, स्पन्दनरूपं मङ्गललक्षणम्, सूचयित्वा=निरूपयित्वा) अये!=इति सम्भ्रमोक्तिः।

करना चाहिए, इसलिए इन गहनों और धनुष को सँभालो। **(यह कहकर राजा सूत को गहने और धनुष देता है।)**

(सूत गहने और धनुष लेता है।)

राजा—जब तक मैं आश्रमवासियों के दर्शन कर लौटूँ, तब तक आप घोड़ों को ठण्डा कर लीजिए (उनकी थकान मिटा लीजिए)।

सूत—जैसी आयुष्मान् की आज्ञा **(प्रस्थान)**।

राजा—**(घूमकर और देखकर)** यह आश्रम है, चलूँ, इसमें प्रवेश करूँ। **(प्रवेश कर भुजा द्वारा स्फुरण रूप शुभ शकुन दर्शाकर)** अरे!

---

tages should indeed be entered in a modest (simple) dress. Just hold these ornaments and bow. *(Having handed over his ornaments and bow to the charioteer)*

(Charioteer takes all things-bow etc.)

King—Charioteer! by the time I come back, having visited the inmates of the penance grove, let the horses be cooled (repose them).

Charioteer—Very well, Long lived one *(exit)*.

King—*(Roaming about and observing)* Here is the hermitage. Let me enter. *(Entering and indicating throbbing arm an good omen)*.

(नेपथ्ये) इदो इदो पिअसहीओ। [इतः इतः प्रियसख्यौ।]

राजा—(कर्णं दत्त्वा) अये! दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते, यावदत्र गच्छामि। (परिक्रम्यावलोक्य च) अये! एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचन-घटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्त्तन्ते। (निरूप्य) अहो! मधुरमासां दर्शनम्—

अन्वयः—इदम् आश्रमपदं शान्तं तथा च बाहुः स्फुरति, इह अस्य फलं कुतः? अथवा भवितव्यानां द्वाराणि सर्वत्र भवन्ति॥ १६॥

शान्तमिति। इदं=परिदृश्यमानम्, आश्रम एव पदम्=स्थानम्, इत्याश्रमपदम्, शान्तं=शमप्रधानम्, तथा च, बाहुः=मे दक्षिणभुजः, स्फुरति=स्पन्दते (स्त्रीलाभं सूचयतीत्यर्थः), इह=आश्रमपदे, अस्य=बाहुस्फुरणस्य, फलं=स्त्रीलाभविषयकफलं, कुतः=कथं सम्भवति? अथवा, भवितव्यानाम्=अवश्यम्भाव्यानामर्थानाम्, द्वाराणि=उपायाः, सर्वत्र भवन्ति। अत्र अर्थान्तरन्यासालङ्कारः, आर्या जातिः।॥ १६॥

भावार्थः—शमप्रधानमिदमाश्रमपदम्, तथाप्यत्र मम दक्षिणभुजः स्पन्दते, सूचयति चायं स्त्रीलाभम्। अत्र बाहुस्फुरणस्य फलं कथं प्राप्तं सम्भवति इति न जाने। उक्तविप्रतिपत्तिं स्वयमेव समाधत्ते—यत् अवश्यम्भाव्यानामर्थानाम् उपायाः ईश्वराधीनत्वात् सर्वत्र अनायासमुत्पद्यन्ते॥ १६॥

(नेपथ्ये=यवनिकापृष्ठभागे परोक्षे वा) (शकुन्तलाया उक्तिरियम्) प्रियसख्यौ=अनसूया-प्रियंवदेति तन्नाम्न्यौ, इदो इदो पिअसहिओ—(शौरसेनीभाषायाम्) इत इतः=अस्यामस्यां दिशि आगच्छेति शेषः।

राजा—(कर्णं दत्त्वा=उक्तालापं श्रोतुं कर्णं नियोज्य) अये! इति आत्मसम्बोधने, दक्षिणस्यां दिशीति दक्षिणेन, वृक्षवाटिकाम्=उद्यानम् (उद्यानस्य सन्निकृष्टदक्षिणपार्श्वभागे इत्यर्थः), आलापः इव=परस्परसम्भाषणमिव, श्रूयते=आकर्ण्यते, यावदत्र गच्छामि=आलापस्थाने गच्छामि।

यह आश्रम का प्रदेश तो सर्वथा शान्त है, (परन्तु) यहाँ आकर मेरी दक्षिण भुजा फड़क रही है। भला यहाँ इस अङ्गस्फुरण का फल (स्त्रीलाभ) कैसे सम्भव है? अथवा अवश्यम्भावी बातों (कार्यों) के लिए सर्वत्र द्वार बन जाते हैं॥ १६॥

(नेपथ्य में) प्रिय सखियो! इधर आओ इधर।

राजा—(कान देकर) अरे! दाहिनी ओर के बाग में बातचीत होती हुई-सी सुनायी दे रही है, तो चलूँ वहीं पहुँचूँ। **(घूमकर और देखकर)** अरे! ये तापसबालिकाएँ अपने-अपने

"The place of this hermitage is tranquil and yet my right arm throbs! where can arise its fruit here? or things destined to happen find doors every where. (16)

(Behind the scenes) This side, this side my friends.

King—(Listening) Oh, to the sight of the grove of trees some thing like a conversation is heard. I shall just go here. *(Goving round and observing)* Oh, here are the hermit girls, coming this way to water young trees with watering pots suited to their size.

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ १७॥

यावदेताश्छायामिमामाश्रित्य प्रतिपालयामि। (इति विलोकयन् स्थितः।)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

(परिक्रम्यावलोक्य च=किञ्चित् सञ्चर्य पुरतः अवलोक्य च) अये!=इति विस्मये, एताः तपस्विकन्यकाः=तापसबालिकाः, स्वप्रमाणानुरूपैः=स्वदेहप्रमाणयोग्यैः, सेचनघटैः=जलसेचनकलशैः, बालपादपेभ्यः=क्षुद्रवृक्षेभ्यः, पयः=जलं, दातुम्=प्रदातुम्, इत एव=अस्यां दिश्येव, अभिवर्तन्ते=अभिमुखमागच्छन्ति। (निरूप्य=अवलोक्य) अहो=इत्याश्चर्ये, आसां=तपस्विकन्यकानाम्, दर्शनम्=रूपम्, मधुरम्=चित्ताह्लादकरमस्ति।

अन्वयः—आश्रमवासिनः जनस्य इदं वपुः यदि शुद्धान्तदुर्लभं (तदा) वनलताभिः उद्यानलताः गुणैः दूरीकृताः खलु॥ १७॥

शुद्धान्तेति। आश्रमे वस्तुं शीलं यस्य तस्य आश्रमवासिनः=तापसाश्रमवासिनः, जनस्य=शकुन्तलादिजनस्य, इदं वपुः=शरीरलावण्यं वा, यदि शुद्धान्तेषु=राजान्तःपुरेषु, दुर्लभम्=दुष्प्रापमस्ति, तदा, वनलताभिः=काननवल्लिभिः, उद्यानलताः=प्रयत्नवर्धिता उद्यानलताः, गुणैः=सौकुमार्यादिभिः, दूरीकृताः=तिरस्कृताः, खल्विति निश्चये॥ १७॥

भावार्थः—यदि राजान्तःपुरेषु दुष्प्रापम् ईदृग् रूपम् आश्रमवासिनो जनस्य दरीदृश्यते तदा निश्चिनोमि यद् अयत्नवर्धिताभिः वनलताभिः सौकुमार्यादिगुणैः सयत्नवर्धिता उद्यानलता सर्वथैव पराजिताः इति॥ १७॥

यावत्=यावत्कालेन, इमां=तारवीयाम् छायामाश्रित्य=आश्रयं गत्वा, एताः=तपस्विकन्यकाः, प्रतिपालयामि=प्रतीक्ष्ये।

प्रमाणानुरूप (छोटे-बड़े) घड़े लेकर छोटे-छोटे पौधों को सींचने के लिए इधर ही आ रही हैं। (**देखकर**) अहो! इनका रूप तो बहुत ही सुन्दर है।

यदि महलों के लिए भी दुर्लभ यह सुन्दर स्वरूप आश्रमवासिनी बालाओं में दिखायी पड़ रहा है तो (कहना पड़ेगा कि) वनलताओं ने सौकुमार्यादि गुणों से उद्यान की लताओं को परास्त कर दिया है।

तो कुछ देर इस छाया में ठहरकर इनकी प्रतीक्षा करूँ। (**इस प्रकार विचार कर उनकी प्रतीक्षा में खड़ा हो जाता है।**)

(**इसके बाद पौधों को सींचती हुई शकुन्तला अपनी सखियों के साथ आती है।**)

(watching closely) Oh! Their appearance is very pleasing (agreeable).

If to people living in a hermitage belongs this lovely form difficult to be found in harems, then certainly are garden creepers distanced in virtues by forest creepers.

Let me resort to this shade and wait *(stands watching)*.

(Then enter Śakuntalā engaged as described with her girl friends)

एका—हला सउंतले! तत्तो वि तादकण्णस्स अस्समरुक्खआ पिअदरा त्ति तक्केमि; जेण णोमालिआकुसुमपरिपेलवावि तुमं एदाणं आलबालपरिऊरणे णिउत्ता। **[हला शकुन्तले! त्वत्तोऽपि तातकण्वस्य आश्रमवृक्षाः प्रियतरा इति तर्कयामि; येन नवमालिका-कुसुमपरिपेलवापि त्वम् एतेषामालवालपरिपूरणे नियुक्ता।]**

शकुन्तला—हला अणसूए! ण केवलं तादस्स णिओओ, मम वि एदेसुं सहोअरसिणेहो। (इति वृक्षसेचनं नाट्यति।) **[हला अनसूये! न केवलं तातस्य नियोगः, ममापि एतेषु सहोदरस्नेहः।]**

द्वितीया—सहि सउंतले! उदअं लंभिदा एदे गिह्मआलकुसुमदाइणो अस्समरुक्खआ। दाणिं अदिक्कंतकुसुमसमए वि रुक्खके सिंचम्ह, तेण अणहिसंधिगुरुओ धम्मो भविस्सदि। **[सखि शकुन्तले! उदकं लम्भिता एते ग्रीष्मकालकुसुमदायिनः आश्रमवृक्षाः। इदानीम् अतिक्रान्तकुसुमसमयानपि वृक्षान् सिञ्चामः। तेन अनभिसन्धिगुरुको धर्मो भविष्यति।]**

(ततः=तदनन्तरम्, यथोक्तव्यापारा=वृक्षसेचनाय घटं वहन्ती, सखीभ्यां सह= अनसूया-प्रियंवदाभ्यां सह, शकुन्तला प्रविशति।)

एका—हला=इति सख्याः सम्बोधने, शकुन्तले! त्वत्तोऽपि=त्वदपेक्षयापि, तातकण्वस्य, आश्रमवृक्षाः=आश्रमपादपाः, प्रियतराः=अतिप्रियाः, इति तर्कयामि=इत्थं सम्भावयामि। येन=येन कारणेन, नवमालिकायाः कुसुमवत् पेलवापि=सर्वतः सुकुमारापि, त्वम्, एतेषाम्=आश्रमपादपानाम्, आलवालानां=वृक्षमूलस्थक्षुद्रखातानाम्, परिपूरणे=सेचने, नियुक्ता=नियोजितासि।

शकुन्तला—हला अनसूये! न केवलं तातस्य=पितुः, नियोगः=आदेशः, ममापि, एतेषु=पादपेषु, सहोदरस्नेहः=सहोदरवत् स्नेहः। (इति=इत्युक्त्वा, वृक्षसेचनं, नाटयति=नाट्येन रूपयति।)

द्वितीया—सखि शकुन्तले! उदकम् =अस्माभिः सिक्तं जलं, लम्भिताः=प्रापिताः, एते= पादपाः, गीष्मकालकुसुमदायिनः=ग्रीष्मर्तौ सुमनप्रदायिनः, आश्रमवृक्षाः=आश्रमपादपाः, इदानीम्=

एक—सखि शकुन्तला! जान पड़ता है कि पिता कण्व को ये आश्रम के वृक्ष तुमसे बढ़कर प्रिय हैं। इसीलिए तो नवीन मालिनी के फूलों से भी कोमल तुम्हें इनके थाले भरने (सींचने) के लिए नियुक्त किया है।

शकुन्तला—सखी अनसूया! केवल पिता की आज्ञा ही नहीं है अपितु मेरा भी इन आश्रम के वृक्षों पर सगे भाई जैसा स्नेह है। **(वृक्ष सींचने का नाट्य करती है)**

दूसरी—प्रिय सखी शकुन्तला! हम लोग ग्रीष्मकाल में फूल देने वाले इन आश्रम के

One—Friend Śakuntalā, I feel that the trees in the hermitage are dearer to father Kanva than you, since he has engaged you who are delicate like the Navamalika flower, to fill their basin.

Śakuntalā—Not only father's command alone! I too have a brotherly affection towards them.

Second friend—Friend Śakuntalā, we have watered those

शकुन्तला— हला पिअंबदे! रमणिज्जं मंतेसि। **[हला प्रियंवदे! रमणीयं मन्त्रयसि।]** (इति भूयो वृक्षसेचनं नाटयति।)

राजा—(निर्वर्ण्य आत्मगतम्) कथमियं सा कण्वदुहिता शकुन्तला! (सविस्मयम्) अहो! असाधुदर्शी खलु भगवान् कण्वः, य इमामाश्रमधर्मे नियुङ्क्ते।

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥ १८॥

अधुना, अतिक्रान्तः=अतिवाहितः, कुसुमानां=पुष्पाणां, समयः=उत्पादनकालः, यैस्तान्—अतिक्रान्तकुसुमसमयान्, अपि, वृक्षान्=पादपान्, सिञ्चामः=जलेन सन्तर्पयामः, तेन=कर्मणा, नास्ति अभिसन्धिः=फलाशा, यस्मिन्, अनभिसन्धिः, गुरुरेव गुरुकः=महान्, धर्मः=कल्याणम्, भविष्यति।

शकुन्तला—हला=इति सख्याः सम्बोधने, प्रियंवदे! रमणीयं=शोभनं, मन्त्रयसि= कथयसि। (इति=एवं, भूयः=पुनः, सेचनं=वृक्षसेचनं, नाटयति।)

राजा—(निर्वर्ण्य=निरीक्ष्य, रूपलावण्यादिसम्पन्नां शकुन्तलामवलोक्य इति भावः, आत्मगतम्=स्वगतम्) कथम्=इति सम्भावनायाम्, इयम्=पुरतःस्थिता, सा=पूर्वं वैखानसेनोक्ता, कण्वदुहिता=कण्वतनया, शकुन्तला अस्तीति शेषः? अहो=इत्याश्चर्ये, असाधुदर्शी=असम्यग् द्रष्टा (अविवेकी), खलु=इति निश्चये, भगवान् कण्वः=कण्वनामा महर्षिः, यः=कण्वः, इमाम्= शकुन्तलाम्, आश्रमधर्मे=तापसव्रते, नियुङ्क्ते=वृक्षसेचनादिव्यापारे नियोजयति।

वृक्षों को सींच चुकी हैं, चलो अब उन वृक्षों को सींचे जिनके फूलने का समय बीत चुका है, इससे निष्काम दान करने का महान् फल प्राप्त होगा।

शकुन्तला—सखी प्रियंवदा! (तुम) सुन्दर परामर्श दें रही हो। **(यह कहकर पुनः वृक्ष सींचने का अभिनय करती है।)**

राजा—**(शकुन्तला को देखकर मन में)** तो क्या यही वह कण्व ऋषि की पुत्री शकुन्तला है। **(आश्चर्यपूर्वक)** अरे! महर्षि कण्व बड़े ही अविवेकी जान पड़ते हैं जो इस (अनुपम सौन्दर्यशालिनी, कोमलाङ्गी शकुन्तला) को आश्रमधर्म (वृक्षादिकों को सींचना आदि) में नियुक्त करते हैं।

जो ऋषि इस नैसर्गिक मनोहर शरीर को तपस्या का कष्ट सहन करने के योग्य बनाने

---

hermit trees, which shall grant flowers in the summer. Let us now go to water those trees whose time of granting flowers has surpassed. By this act of selfless service we will achieve a great righteousness.

Śakuntalā—Friend Priyaṁvadā your advice indeed is very suitable. *(Again acts watering.)*

King—*(Observing keenly to himself)* How! is this that daughter of Kanva by name Śakuntalā? *(with surprise)* void of discrimination indeed is his reverence Kaṇva, who appoints her to the duties of the hermitage.

The sage, who expects to render this natural attractive form

भवतु, पादपान्तरित एव विश्वस्तां तावदेनां पश्यामि (इति तथा करोति)।

शकुन्तला—हला अणसूए! अदिपिणद्धेण वक्कलेण पिअंबदाए दढं पीडिदा म्हि, ता सिढिलेहि दावं णं। **[हला अनसूये! अतिपिनद्धेन वल्कलेन प्रियंवदया दृढं पीडितास्मि, तत् शिथिलय तावदेनम्।]**

अनसूया—तह। **[तथा।]** (इति शिथिलयति।)

अन्वयः—यः इदं अव्याजमनोहरं वपुः किल तपःक्षमं साधयितुम् इच्छति सः ध्रुवं नीलोत्पलपत्रधारया शमीलतां छेत्तुं व्यवस्यति॥ १८॥

इदमिति। यः=ऋषिः, इदं=पुरोवर्तमानम्, अव्याजेन=कारणं विनैव, स्वभावत एव इत्यर्थः, मनोहरं=सुन्दरम्, वपुः=शरीरम्, किलेति=अनुकम्पायामसहने वा, तपःक्षमं=तपःसाधनयोग्यम्, साधयितुं=सम्पादयितुम्, इच्छति=वाञ्छति। सः=ऋषिः, ध्रुवं=निश्चितम्, नीलोत्पलपत्रस्य= इन्दीवरदलस्य, धारया=पार्श्वदेशेन (निशितपार्श्वभागेन), शमीलतां=शमीवल्लीं, छेत्तुं=कर्त्तितुम्, व्यवस्यति=प्रयतते। निदर्शनालङ्कारः, वंशस्थं वृत्तञ्च॥ १८॥

भावार्थः—यः महर्षिः कण्वः पुरोदृश्यमानं शाकुन्तलीयं स्वभावत एव मनोहरं शरीरं तपःसाधनयोग्यं विधातुं वाञ्छति, सः ऋषिवर्यः इन्दीवरस्य निशितपार्श्वदेशेन शमीलतां कर्त्तितुं प्रयतते इति तर्कयामि॥ १८॥

भवतु=कण्वोऽसाधुदर्शी साधुदर्शी वाऽस्तु तस्मिन्न मे किञ्चित् साध्यम्। (अहं तु) पादपान्तरित एव= वृक्षपृष्ठे आत्मानं गोपयित्वैव, विश्वस्ताम्=अनुद्विग्नचित्ताम्, एनां=शकुन्तलां, पश्यामि=अवलोकयामि (इति तथा=स्वविचारमनुरूपं करोति)।

शकुन्तला—हला अनसूये! प्रियंवदया=तन्नामकसख्या, अतिपिनद्धेन=दृढबद्धेन, वल्कलेन=तरुत्वग्वाससा, दृढं=बलवत्, पीडितास्मि=भृशं दुःखितास्मि, तत्=तस्मात् कारणात्, एनं=वल्कलं, शिथिलय=शिथिलं कुरु।

की इच्छा करता है, वह ऋषि निश्चय ही नीलकमल के पत्र की धार से शमीलता को काटना चाहता है॥ १८॥

अस्तु, वृक्ष के पीछे छिपकर ही विश्वस्त (कोई उसे नहीं देख रहा है, इस विचार से आश्वस्त) इस शकुन्तला को देखता हूँ **(वैसा ही करता है)**।

शकुन्तला—सखी अनसूया! प्रियंवदा ने इस वल्कल को बहुत कसकर बाँध दिया है, जिससे मुझे कष्ट हो रहा है। अतः इसे ढीला कर दो।

अनसूया—अच्छा **(वल्कल ढीला करती है)**।

---

capable of penance, certainly attempts to cut a Semi creeper with the sharp edge of the petal of a blue lotus. (18)

Well, even as I am concealed by trees I shall just observe her at her case *(does the same)*.

Śakuntalā—Friend Anasūyā! I am feeling uneasy (pinioned) with this bark too tightly fastened by Priyaṁvadā. Please, just loosen it.

Anasūyā—*(Loosens)*.

प्रियंवदा—(सहासम्) एत्थ दाव पओहरवित्थारहेदुअं अत्तणो जोब्बणारंभं उवालह, मं कि उवालहसि ? [**अत्र तावत् पयोधरविस्तारहेतुकम् आत्मनो यौवनारम्भम् उपाल- भस्व, मां किमुपालभसे ?**]

राजा—सम्यगियमाह—

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण॥ १९॥

अनसूया—(शिथिलयति=शिथिलं करोति।)

प्रियंवदा—(सहासम्) अत्र=अस्मिन् पीडाविषये, पयोधरयोः=कुचयोः, विस्तारस्य= प्रसारस्य (औन्नत्यस्य), हेतुकम्=कारणभूतम्, आत्मनः=स्वस्य, यौवनं=तारुण्यम्, उपालभस्व= तिरस्कुरु, मां किमुपालभसे=मां कथं तिरस्करोषि ?

(यौवनारम्भात् स्तनयोः पीवरीभवनेन पीडा सञ्जायते न तु मत्कर्त्तृकवल्कलबन्धनेनेति भावः।)

राजा—इयं=सखी प्रियंवदा, सम्यगाह=उचितं भणति—

अन्वयः—इदं अभिनवम् अस्याः वपुः स्कन्धदेशे उपहितसूक्ष्मग्रन्थिना स्तनयुग- परिणाहाच्छादिना वल्कलेन पाण्डुपत्रोदरेण पिनद्धं कुसुममिव स्वां शोभां न पुष्यति॥ १९॥

इदमुपेति। इदं=सम्प्रति दृश्यमानम्, अभिनवम्=नवीनम्, अस्याः=शकुन्तलायाः, वपुः= शरीरं, स्कन्धदेशे=अंशभागे, उपहितः=दत्तः, सूक्ष्मः=क्षुद्रः, ग्रन्थिः=बन्धनं, यस्य तेन, उपहित- सूक्ष्मग्रन्थिना, (तथा) स्तनयुगस्य=कुचद्वयस्य, यः, परिणाहः=विशालता, तमाच्छादयतीति तेन स्तनयुगपरिणाहाच्छादिना, वल्कलेन=तरुत्वङ्निर्मितवस्त्रविशेषेण, पाण्डुवर्णानां पत्राणां=दलानां,

---

प्रियंवदा—(**हँसकर**) यहाँ तो तुम्हें अपनी स्तनवृद्धि के कारणभूत यौवन को उलाहना देना चाहिए, मुझे भला क्यों उलाहना दे रही हो ?

राजा—यह सखी ठीक ही कह रही है—

इसका नवस्फुटित यौवन कन्धे पर बँधे हुए सूक्ष्म गाँठ वाले तथा दोनों स्तनों के विस्तार को ढाँपने वाले वल्कल के कारण उसी प्रकार अपनी शोभा को पुष्ट नहीं कर पा रहा है—जैसे पीले पत्तों से ढँका हुआ पुष्प अपनी पूरी शोभा नहीं प्रगट कर पाता॥ १९॥

Priyaṁvadā*—*(Smiling) In this matter blame your youth which causes the expansion of breasts, why do you blame me?

***King*—**She is correct. This blooming body of her, (who is dressed) in a bark which covers the expanse of her charming, grownup breasts and has its delicate knot fastened on the region of her shoulders, doet not exhibit its proper charm, like a flower enveloped in the interior of a pale leaf. (19)

अथवा काममननुरूपमस्या वपुषा वल्कलं न पुनरलङ्कारश्रियं न पुष्यति। कुतः ?—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥ २०॥

उदरेण=गर्भेण, पिनद्धम्=बद्धम्, कुसुममिव=पुष्पमिव, स्वां=स्वकीयां, शोभां=कान्तिम्, न पुष्यति=नैव पुष्णाति (बिभर्त्ति)। अत्र उपमालङ्कारः, मालिनी नाम वृत्तम्॥ १९॥

भावार्थः—इदं नवीनं शकुन्तलायाः शरीरम् अंशभागे न्यस्तसूक्ष्मबन्धनेन, कुचद्वयस्य विशालताच्छादकेन वल्कलेन पाण्डुपत्रोदरेण बद्धमाच्छादितं वा पुष्पमिव स्वकीयां शोभां न बिभर्त्ति॥ १९॥

अथवा—अस्याः=शकुन्तलायाः, वपुषः=शरीरस्य, कामम्=अत्यर्थम्, अननुरूपम्=अयोग्यमपि, वल्कलं=वृक्षत्वग्निर्मितपरिधानम्, पुनरलङ्कारश्रियम्=आभरणजनितशोभाम्, न पुष्यति=न बिभर्त्ति इति, अपितु पुष्यत्येवेत्यर्थः। कुतः—अत्र हेतुत्वेन पद्यमवतारयति।

अन्वयः—शैवलेन अनुविद्धम् अपि सरसिजं रम्यं (भवति), (तथा) हिमांशोः लक्ष्म मलिनमपि लक्ष्मीं तनोति; (तदिव) इयं तन्वी वल्कलेनापि अधिकमनोज्ञा (दृश्यते)। हि मधुराणाम् आकृतीनां किमिव मण्डनं न भवति॥ २०॥

सरसिजमिति। शैवलेन=जलनील्या (शैवालम्), अनुविद्धं=सम्पृक्तम् आच्छादितं वा, अपि, सरसिजम्=कमलम्, रम्यं=मनोहरं भवति। (तथा) हिमांशोः=चन्द्रस्य, लक्ष्म=कलङ्कः, मलिनमपि=दोषयुक्तमपि, लक्ष्मीं=शोभां, तनोति=विस्तारयति। (तदिव) इयम्=दृश्यमाना, तन्वी=कोमलाङ्गी, वल्कलेनापि=धारितवृक्षत्वग्वस्त्रेणापि, अधिकमनोज्ञा=अधिकमनोहरा (दृश्यते), हि=यतः, मधुराणां=स्वभावतः सुन्दराणाम्, आकृतीनाम्=स्वतःसौन्दर्यशालिदेहबिभृताम्, किमिव=वस्तु, मण्डनं=भूषणं, न भवति—इति काकुः अपितु सर्वमपि भवति एव इत्यर्थः। अत्र प्रतिवस्तूपमालङ्कारः। मालिनीवृत्तम्॥ २०॥

अथवा—यद्यपि यह वल्कल इसके अनुरूप नहीं है तथापि यह इसके अलङ्कार की शोभा को न बढ़ाता हो ऐसी बात नहीं। क्योंकि—

सेवार से आच्छादित होने पर भी कमल सुन्दर ही प्रतीत होता है। मलिन होने पर भी चन्द्रमा का कलङ्क शोभा का ही विस्तार करता है। उसी प्रकार यह कृशाङ्गी बाला भी वल्कल धारण कर और अधिक मनोहर दिखायी पड़ती है। वस्तुतः स्वभाव से मधुर लगने वाली आकृतियों के लिए भला कौन-सी वस्तु अलङ्करण का साधन नहीं बन जाती॥ २०॥

Or, though this bark is unsuited to her body, but it is not that, it does not cherish the charm of embellishments, why?

A lotus, though encased in moss, is charming. The speck, though filthy, heightens the beauty of the moon. Accordingly this slender lady is more attractive even with the bark, what indeed is possibly not an embellishment to lovely forms? (20)

अपि च—

कठिनमपि मृगाक्ष्या वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति।
विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिव कमलिन्याः कर्कशं वृन्तजालम्॥ २१॥

शकुन्तला—(अग्रतोऽवलोक्य) सहीओ! एस बादेरिदपल्लवांगुलीहिं किंपि वाहरेदि विअ मं चूअरुक्खओ। ता जाव णं संभावेमि। [**सख्यौ! एष वातेरितपल्लवाङ्गुलीभिः किमपि व्याहरतीव मां चूतवृक्षः। तद् यावदेनं सम्भावयामि।**] (इति तथा करोति।)

भावार्थः—यथा शैवलेनाच्छादितमपि कमलं मनोहरमेव भवति। यथा चन्द्रस्य मलिनोऽपि कलङ्कः शोभां एव विस्तारयति तदिव इयं तन्वी बाला वल्कलभूषिताऽपि अधिक-मनोहरा दृश्यते। यतः स्वभावतः मनोहराकृतीनां सर्वमेव वस्तुजातं (देहयात्रार्थं धृतवस्त्रादिकम्) मण्डनमेव भवति। नास्त्यत्र सन्देहलेशावसरः॥ २०॥

अपि च=अन्यच्च—

अन्वयः—मृगाक्ष्याः कठिनमपि कान्तरूपं वल्कलं विकचसरसिजायाः स्तोकनिर्मुक्त-कण्ठं कर्कशं निजं वृन्तजालम् इव मनसि स्वल्पमपि रुचिभङ्गं न आदधाति॥ २१॥

कठिनमिति। मृगस्येवाक्षिणी यस्यास्तस्याः मृगाक्ष्याः=हरिणनयनायाः, कठिनमपि=कर्कशमपि, कान्तरूपम्=(अङ्गसम्पर्केण) मनोहराकारम्, वल्कलं=पादपत्वक्परिधानं, विकचं=विकसितं, सरसिजं=कमलं, यस्यास्तस्याः विकचसरसिजायाः, स्तोकम्=ईषद् यथा स्यात्तथा, निर्मुक्तः=किञ्चिद् बहिरागतः, कण्ठः=निजाधोदेशः, यस्य तत् स्तोकनिर्मुक्तकण्ठम्, कर्कशं=कठिनं, निजं=स्वकम्, वृन्तजालम्=वृन्तसमूहः, इव=यथा, मनसि=चेतसि, स्वल्पमपि=किञ्चिदपि, रुचिभङ्गम्=अनुरागहानिं, न आदधाति=न जनयति। अत्र श्रौत्युपमालङ्कारः। मालिनी वृत्तम्॥ २१॥

भावार्थः—हरिणनयनायाः शकुन्तलाया रूक्षमपि रुचिराङ्गसम्पर्केण मनोहराकारं वल्कलं, प्रफुल्लकमललतायाः स्तोकनिर्मुक्तकण्ठं, स्वकीयकर्कशवृन्तसमूह इव मनसि स्वल्पमपि रुचिभङ्गं न जनयति॥ २१॥

और भी—इस मृगनयनी के कोमल शरीर के लिए यद्यपि यह वल्कल कठोर है तथापि जैसे जल से किञ्चित् बाहर निकली हुई विकसित कमलिनी का अपना कर्कश वृन्तसमूह किसी भी प्रकार अरुचिकर नहीं लगता, वैसे ही इसके द्वारा धारण किया गया यह रूक्ष वल्कल मन की रुचि में किसी प्रकार का विकार उत्पन्न नहीं करता॥ २१॥

शकुन्तला— (**सामने देखकर**) सखियो! यह आम का वृक्ष वायु से हिलती हुई

And also—

For this deer eyed, though this bark is very rough, even though it appears pleasing like a mass of the foot stalks of that blown lotus creeper which has come out a litttle from the water and it does not create any perturbance in our mind too. (21)

Śakuntalā*—*(Looking forward) This mango tree as though

प्रियंवदा—हला सउंतले! इध ज्जेव मुहुत्तअं चिट्ठ। [**हला शकुन्तले! इहैव मुहूर्त्तकं तिष्ठ।**]

शकुन्तला—किं णिमित्तं। [**किं निमित्तम्?**]

प्रियंवदा—तए समीवट्ठिदाए लदासणाधो विअ अअं चूअरुक्खओ पडिहादि। [**त्वया समीपस्थितया लतासनाथ इव अयं चूतवृक्षः प्रतिभाति।**]

शकुन्तला—अदो ज्जेव तुमं पिअंबद त्ति भणीअसि। [**अत एवं त्वं प्रियंवदेति भण्यसे।**]

राजा—अवितथमाह प्रियंवदा। तथा ह्यस्याः—

शकुन्तला—सख्यौ=अनसूया-प्रियंवदा चेति, एषः चूतवृक्षः=आम्रवृक्षः, वातेन=वायुना, ईरिताः=प्रेरिताः, सञ्चालिताः वा, पल्लवाः=पत्राणि एव, अङ्गुल्यस्ताभिः वातेरितपल्लवाङ्गुलीभिः, मां=शकुन्तलाम्, किमपि=जलदानायेति भावः, व्याहरतीव=कथयतीव। तद्=तस्मात् कारणात्, यावदित्यवधारणे, एनं=चूतवृक्षम्, सम्भावयामि=जलदानेन तर्पयामि (अभिनन्दयामि)। (इति= इत्युक्त्वा, तथा करोति=जलदानं करोति।)

प्रियंवदा—हला शकुन्तले=सखि शकुन्तले! मुहूर्तकं=किञ्चित्कालं, इहैव=अत्रैव, तिष्ठ= प्रतीक्षस्व।

शकुन्तला—किं निमित्तम्?=केन हेतुना तिष्ठामीति भावः।

प्रियंवदा—समीपे=पार्श्वे, स्थितया=विद्यमानया, त्वया=शकुन्तलया, अयम्=एषः, चूतवृक्षः=आम्रवृक्षः, लतासनाथः=लतायुक्तः, इव=यथा, प्रतिभाति=शोभते।

शकुन्तला—अत एव=एवं प्रियवचनकथनादेव, त्वं प्रियंवदेति अस्मद्विधैरभिधीयसे।

अंगुलियों द्वारा मानो मुझसे कुछ कहना चाहता है। तो चलूँ, इसका सम्मान करूँ (इसका अभिनन्दन करूँ)। **(यह कहकर उसी प्रकार करती है।)**

प्रियंवदा—सखी शकुन्तले! (तुम) थोड़ी देर यहीं ठहरो।

शकुन्तला—किसलिए?

प्रियंवदा—तुम्हारे पास रहने से यह आम का वृक्ष लतासनाथ-सा दिखायी देता है।

शकुन्तला—इसीलिए (ऐसी मधुर बातें कहने के कारण ही) तुम्हें प्रियंवदा कहा जाता है।

राजा—प्रियंवदा ने सत्य ही कहा है—

---

hastens me on with its fingers of leaves set in motion by the air. Let me just honour it *(Acts accordingly)*.

Priyaṁvadā—Friend Śakuntalā, just stay here for some time.

Śakuntalā—What for?

Priyaṁvadā—For, with you near, this mango tree appears as though possessed of a creeper.

Śakuntalā—Hence indeed you are called Priyaṁvadā.

King—The truth Priyaṁvadā has said about Śakuntalā.

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥ २२॥

अनसूया—हला सउंतले! इअं सअंबरबहु सहआरस्स तुए किदणामहेआ वनदोसिणी त्ति णोमालिआ णं विसुमरिदासि ? **[हला शकुन्तले! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनतोषिणीति नवमालिका; एनं विस्मृतासि ?]**

शकुन्तला—तदो अत्ताणं पि विसुमरिस्सं। (लतामुपेत्य अवलोक्य च) हला! रमणीओ क्खु कालो इमस्स पादवमिहुणस्स रदिअरो संवुत्तो। जेग णवकुसुमजोब्बणा णोमालिआ अअं पि बहुफलदाए उअभोअक्खमो सहआरो। (इति पश्यन्ती तिष्ठति।) **[तत आत्मानमपि विस्मरिष्यामि। हला! रमणीयः खलु कालः अस्य पादपमिथुनस्य रतिकरः संवृत्तः। येन नवकुसुमयौवना नवमालिका, अयमपि बहुफलतया उपभोगक्षमः सहकारः।]**

राजा—प्रियंवदा, अवितथं=सत्यम्, आह=उक्तवतीति भावः।

अन्वयः—अधरः किसलयरागः, बाहू कोमलविटपानुकारिणौ, (तथा) अङ्गेषु कुसुममिव लोभनीयं यौवनं सन्नद्धम्॥ २२॥

अधर इति। अधरः=अधरोष्ठः, किसलयस्य=नवपल्लवस्येव, रागः=लौहित्यं, यस्य सः किसलयरागः=रागेण नवपल्लवतुल्यः, बाहू=भुजौ, कोमलयोः=मृदुलयोः, विटपयोः=स्कन्धोर्ध्व-शाखयोः, अनुकारिणौ=तत्सदृशौ, तथा, अङ्गेषु=अवयवेषु, कुसुममिव=पुष्पमिव, लोभनीयं=चित्ताकर्षकम्, यौवनम्=तारुण्यम्, सन्नद्धम्=प्रकटीभूतम्। अत्रोपमालङ्कारः। आर्या जातिः॥ २२॥

भावार्थः—अस्या अधरोष्ठः रागेण नवपल्लवप्रतिमः, भुजौ तु कोमलविटपानुकारिणौ, तथा शरीरावयवेषु कुसुममिव चित्ताकर्षकं यौवनं सञ्जातम्; अत एव सत्यमेव प्रियंवदया-भिहितम्॥ २२॥

अनसूया—हला शकुन्तले! इयं, सहकारस्य=आम्रस्य, स्वयं वृणोतीति स्वयंवरा, सा चासौ वधूश्चेति स्वयंवरवधूः=स्वयमेव कृताश्रयणाद्वधूरिव स्थिता इति भावः. वनम्=उद्यानम्=सौरभ्येणानन्दयतीति वनतोषिणी, इति=इत्थम्, त्वया=भवत्या, कृतं नामधेयं=नाम, यस्याः सा कृतनामधेया, नवमालिका (अस्ति), एनां=नवमालिकां, विस्मृताऽसि (किम्) ?

(इसका) अधरोष्ठ रक्तिमा में नवपल्लव के समान है। दोनों भुजाएँ दो कोमल शाखाओं से समान हैं और फूल के समान रूप-सौरभसम्पन्न यौवन इसके समस्त अङ्गों में व्याप्त है॥ २२॥

अनसूया—सखि शकुन्तले! यह आम की स्वयंवर (अपने आप वरने वाली) वधू है। तुम्हीं ने इस नवमालिका (जूही) का नाम वनतोषिणी रखा था। क्या तुम इसे भूल गई ?

Indeed her—

Lower lip has the redness of a fresh leaf her arms imitate (copy) tender twigs and her youth, charming (attractive) like a flower, pervades her limbs. (22)

***Anasūyā*—**Dear Śakuntalā! here is the Navamālikā, the self choosen wife of the mango tree, named by you as Vanajyotsnā. Have you forgotten it?

प्रियंवदा—(सस्मितम्) अणसूए! जाणासि किं णिमित्तं सउंतला वणदोसिणीं ादिमेत्तं पेक्खदि त्ति। [**अनसूये! जानासि किं निमित्तं शकुन्तला वनतोषिणीमतिमात्रं प्रेक्षत ते।**]

अनसूया—ण क्खु विभावेमि, ता कधेहि मे। [**न खलु विभावयामि, तत् कथय मे।**]

शकुन्तला—ततः=तदा तु (तर्हि), आत्मानमपि=स्वस्वरूपमपि, विस्मरिष्यामि (मत्कृते स्याविस्मरणमात्मविस्मरणवदसम्भाव्यम्।) (लतामुपेत्य=अन्तिके गत्वा निरीक्ष्य च) हला= खि! पादपमिथुनस्य=नवमालिकासहकारयोः, रतिकरः=प्रेमवर्द्धकः, कालः=समयः, संवृत्तः= ातः (उपस्थितः), येन, नवं=नवीनम्, कुसुमं=पुष्पं, स्त्रीपक्षे रजश्च यस्मिन् तथाभूतं, यौवनं= रुण्यं, यस्याः सा नवकुसुमयौवना, नवमालिका=वनतोषिणी, अयम्=आम्रः (सहकारः) अपि, हूनि फलानि=आम्राणि, पुरुषपक्षे (शुक्राणवः) रेतांसि, यस्य तस्य भावस्तया बहुफलतया, पभोगक्षमः=लोकैः सेव्यः, अन्यत्र सम्भोगयोग्यश्च। (इति=इत्युक्त्वा, पश्यन्ती=साभिलाषमव- ोकयन्ती तिष्ठति। एतेन शकुन्तलायास्तादृशयुवकसम्पर्काभिलाषा संसूच्यते।)

प्रियंवदा—(सस्मितम्=ईषद्हाससहितम्) अनसूये! शकुन्तला=अस्मद् सखी, किं ामित्तं, वनतोषिणीम्=नवमालिकाम्, अतिमात्रं=मुहुर्मुहुः, प्रेक्षते=अवलोकयति, इति जानासि िम्?

अनसूया—खलु=निश्चयेन, न अवधारयामि=विभावयामि। तत्=तन्निमित्तं, मे=मह्यं, थय=श्रावय।

शकुन्तला—(यदि इसे भूलूँगी) तो स्वयं को भी भूल जाऊँगी। (**लता के निकट ाकर और उसे देखकर**) सखी! इन दोनों (लता और वृक्ष) का यह अनुराग बढ़ाने वाला मय आ गया है; क्योंकि नवमालिका नवीन कुसुम रूपी यौवन से लदी है और यह आम का क्ष भी बहुत फलों से सम्पन्न होने के कारण इसका उपभोग करने में समर्थ हो गया है। **देखती हुई खड़ी हो जाती है।)**

प्रियंवदा—(**मुस्कराती हुई**) अनसूये! जानती हो, शकुन्तला वनतोषिणी को इस कार बार-बार (गहराई से) क्यों देख रही है?

अनसूया—मैं तो नहीं जानती, अतः मुझे बताओ।

***Śakuntalā*—**Then I shall forget even myself. *(Approa- hing the creeper and observing it steadily)* Friend! at a charming eason indeed has the union between this couple (pair), the creeper d the tree taken place. Since Vanajyotsnā is possessed of youth narked) with fresh flowers and the mango tree, bent with plenty fruits is capable of enjoyment owing to its possession of lovely aves.

***Priyaṁvadā*—**Anasūyā! do you know for what reason akuntalā is looking steadily at this Vanajyotsnā?

***Ansūyā*—**I am unable to guess! Please tell me (about it).

प्रियंवदा—जह वणदोसिणी अणुरूवेण पादवेण संगदा, तह अहंपि अत्तणो अणुरूवं वरं लहेअं त्ति। [**यथा वनतोषिणी अनुरूपेण पादपेन सङ्गता, तथा अहमपि आत्मनः अनुरूपं वरं लभेय इति।**]

शकुन्तला—एस दे अत्तणो चित्तगदो मणोरहो। [**एष ते आत्मनश्चित्तगतो मनोरथः।**] (इति कलशमावर्जयति।)

अनसूया—हला सउंतले! इअं तादकण्णेण तुमं विअ सहत्थेण संबड्ढिदा माहवीलदा, ता कधं इमं विसुमरिदासि? [**हला शकुन्तले! इयं तातकण्वेन त्वमिव स्वहस्तेन संवर्द्धिता माधवीलता, तत् कथमिमां विस्मृतासि?**]

शकुन्तला—तदा अत्ताणंपि विसुमरिस्सं। (लतामुपेत्यावलोक्य च सहर्षम्) अच्चरीअं अच्चरीअं, पिअंबदे! पिअं दे णिवेदेमि। [**तत आत्मानमपि विस्मरिष्यामि। आश्चर्यमाश्चर्यम्। प्रियंवदे! प्रियं ते निवेदयामि।**]

प्रियंवदा—यथा=येन प्रकारेण, वनतोषिणी=नवमालिका, अनुरूपेण=सदृशेन (रूपादिगुणैरिति भावः), सङ्गता=सम्मिलिता, तथा=तेनैव प्रकारेण, अहमपि=शकुन्तलापि, आत्मनः=स्वस्य, अनुरूपम्=वयोरूपादिगुणैः सदृशम्, वरं लभेयेति=वरं प्राप्नुयाम् इति।

शकुन्तला—एषः=कथितः, ते=तव, आत्मनः=स्वकीय एव, मनोरथः=अभिलाषः, न तु ममेति भावः। (इति=इत्थं, कलशं=भाण्डं, पादपमिथुनालवाले जलदानाय, आवर्जयति=अधोमुखं करोति।)

अनसूया—हला शकुन्तले! इयं=पुरोवर्त्तिनी नवमालिका, तातकण्वेन=जनककण्वमहर्षिणा, त्वमिव=यथा त्वं तथैव, स्वहस्तेन=स्वकरेण, संवर्द्धिता=पोषिता, तत्=तस्मात्, कथमिमां=वनतोषिणीं, विस्मृतासि=जलं दातुं विस्मृतासि।

शकुन्तला—ततः=यद्येवं तदा तु, आत्मानमपि=स्वात्मानमपि, विस्मरिष्यामि (यथा मम

प्रियंवदा—जैसे वनतोषिणी अपने अनुरूप वृक्ष की जीवनसङ्गिनी बन गई है वैसे ही मुझे भी अपने अनुरूप वर प्राप्त हो, इसलिए।

शकुन्तला—यह तुम्हारे अपने मन का भाव है। (**यह कहकर घड़ा उडेलती है।**)

अनसूया—सखि शकुन्तले! इस वनतोषिणी को पिता कण्व ने तुम्हारी ही भाँति अपने हाथ से पाल-पोसकर बढ़ाया है, फिर तुम इसे कैसे भुला रही हो?

शकुन्तला—(यदि ऐसा है तब तो) मैं स्वयं को भी भूल जाऊँगी। (**लता के पास**

Priyaṁvadā—As Vanajyotsnā is united with a worthy tree, accordingly may I also obtain a bridegroom worthy of me.

Śakuntalā—This certainly is the desire of your own self. *(Inverts the pitcher).*

Anasūyā—Dear Śakuntalā! Father Kaṇva grew up this Mādhavī creeper by his own hands like you, as such, how you are forgetting it?

Śakuntalā—Then I shall forget even my self *(Approaching*

प्रियंवदा—सहि! किं मे पिअं ?। **[सखि! किं मे प्रियम् ?]**

शकुन्तला—असमए क्खु एसा आमूलादो मुउलिदा माहवीलदा। **[असमये खल्वेषा आमूलात् मुकुलिता माधवीलता।]**

उभे—(सत्वरमुपगम्य) सहि! सच्चं सच्चं ?। **[सखि! सत्यं सत्यम् ?]**

शकुन्तला—सच्चं किं ण पेक्खध। **[सत्यं किं न प्रेक्षेथे।]**

प्रियंवदा—(सहर्षं निरूप्य) सहि! तेण हि पडिप्पिअं दे णिवेदेमि। **[सखि! तेन हि प्रतिप्रियं ते निवेदयामि।]**

आत्मा हिताहितविषये सततमविस्मरणीयः तथेयमपि अविस्मरणीयैव ममेति भावः)। (लतां= नवमालिकां, उपेत्य=प्राप्य, पार्श्वे गत्वा, च=तथा, अवलोक्य=दृष्ट्वा, सहर्षम्=हर्षपूर्वकम्), आश्चर्य-माश्चर्यम्, प्रियंवदे! ते=तुभ्यम्, प्रियम्=आह्लादजनकम् (किमपि वृत्तम्), निवेदयामि=सूचयामि।

प्रियंवदा—सखि! शकुन्तले! मे=मम, प्रियं=प्रीतिकरं किमस्ति ?

शकुन्तला—खलु=निश्चयेन, एषा=पुरोवर्तिनी, माधवीलता=नवमालिका, असमये= अकाले, आमूलात्=मूलप्रदेशादारभ्य, मुकुलिता=मुकुलानि=सञ्जातानि अस्या इति मुकुलिता= कलिकाभिः भरिता।

उभे—(सत्वरम्=शीघ्रम्, उपगम्य=पार्श्वे गत्वा), सखि! सत्यम्-सत्यम्=सत्यमेव कथयसि किम्? इति भावः।

शकुन्तला—सत्यमेव, किं न प्रेक्षेथे ?

जाकर और उसे देखकर हर्षपूर्वक) आश्चर्य है, आश्चर्य है! प्रियंवदा! मैं तुम्हें एक आनन्ददायक समाचार दे रही हूँ।

प्रियंवदा—सखी! मुझे प्रिय लगने वाली बात कौन-सी है ?

शकुन्तला—यह माधवीलता बिना समय के ही आपाद कलियों से लद गई है।

दोनों—**(शीघ्र पास जाकर)** सखी! सच है, सच है।

शकुन्तला—सच है, क्या तुम दोनों नहीं देखती ?

प्रियंवदा—**(हर्षपूर्वक देखकर)** सखी! इस प्रिय समाचार के बदले मैं भी तुम्हें एक प्रिय बात बताती हूँ।

---

the creeper and seeing it, with joy) wonderful! wonderful!! Dear Priyaṁvadā! I tell you some thing pleasing.

Priyaṁvadā—What is the pleasing thing for me?

Śakuntalā—Without season, this Mādhavī creeper is covered with flowers from top to bottom.

Both—*(Quickly going nearer)* Dear one! it is exactly correct!

Śakuntalā—almost correct. Are you not seeing it.?

Priyaṁvadā—*(Looking with joy)* Dear! in return I too want to inform you a good news.

शकुन्तला—किं मे पडिप्पिअं? **[किं मे प्रतिप्रियम्?]**

प्रियंवदा—आसण्णपाणिग्गहणासि तुमं। **[आसन्नपाणिग्रहणासि त्वम्।]**

शकुन्तला—(सासूयमिव) एस दे अत्तणो चित्तगदो मणोरहो, ता ण दे वअणं सुणिस्सं। **[एष ते आत्मनश्चित्तगतो मनोरथः, तन्न ते वचनं श्रोष्यामि।]**

प्रियंवदा—सहि! ण क्खु परिहासेण भणामि, सुदं मए तादकण्णस्स मुहादो तुहकल्लाणसूअअं एदं णिमित्तं त्ति। **[सखि! न खलु ते परिहासेन भणामि, श्रुतं मया तातकण्वस्य मुखात् तव कल्याणसूचकम् एतन्निमित्तमिति।]**

प्रियंवदा—(सहर्षम्=हर्षपूर्वकम्, निरूप्य=अवलोक्य) सखि=शकुन्तले! तेन=कारणेन, हि=निश्चयेन, ते=तुभ्यम्, प्रतिप्रियम्=प्रत्याह्लादकरं, निवेदयामि=कथयामि।

शकुन्तला—मे=मम, प्रतिप्रियम्=प्रियस्थानप्रीतिकरं किमस्ति?

प्रियंवदा—त्वम्, आसन्नं=सन्निहितं, पाणिग्रहणं-=विवाहः, यस्याः सा आसन्नपाणिग्रहणा असि।

शकुन्तला—(सासूयमिव=सरोषमिव) एषः=पाणिग्रहणरूपः, ते=तव, आत्मनः=स्वकीयस्य, मनोरथः=अभिलाषः, तत्=तस्मात्, ते=तव, वचनं=कथनं, न श्रोष्यामि=आकर्णयिष्यामि।

प्रियंवदा—सखि! न=नहि, खलु=इति निश्चयेन, परिहासेन=उपहासेन, छलेनेति भावः, भणामि=कथयामि, मया=प्रियंवदया, तातकण्वस्य=पितुः कण्वस्य, मुखात् श्रुतम्=आकर्णितम्, (यत्) एतन्निमित्तम्=अकाले माधवीलतामुकुलरूपं लक्षणम्, तव=भवत्या, कल्याणसूचकम्=पाणिग्रहणनिवेदकम् इति।

(तातकण्वेन निर्दिष्टं पुरा यद् यदि असमये माधवीलता मुकुलिता भवेत् तर्हि अचिरेणैव शकुन्तलायाः पाणिग्रहणमवश्यं भविष्यतीति भावः।)

शकुन्तला—मुझे बदले में कौन-सी प्रिय बात सुनाओगी?

प्रियंवदा—शीघ्र ही तुम्हारा विवाह होने वाला है।

शकुन्तला—**(क्रोधपूर्वक देखती हुई)** यह तुम्हारे अपने मन का भाव है, अतः तुम्हारे वचन नहीं सुनूँगी।

प्रियंवदा—सखी! मैं तुमसे मजाक में (यह) नहीं कह रही हूँ। मैंने तात कण्व के मुख से सुना था कि इस माधवीलता का इस प्रकार असमय मुकुलित होना तुम्हारे विवाह का परिचायक है।

***Śakuntalā*—**What is that pleasing news for me?

***Priyaṁvadā*—**You will get married very soon.

Śakuntalā*—(With anger)* This is your own thinking. Now I shall not hear your words more.

***Priyaṁvadā*—**Dear! I am not joking. I heard from father

अनसूया—हला पिअंबदे! अदो ज्जेव ससिणेहा सउंतला माहवीलदां सिञ्चदि। **[हला प्रियंवदे! अत एव सस्नेहा शकुन्तला माधवीलतां सिञ्चति।]**

शकुन्तला—जदो बहिणी मे भोदि, तदो किं त्ति ण सिञ्चेमि। (इति कलशमावर्जयति।) **[यतो भगिनी मे भवति, ततः किमिति न सिञ्चामि।]**

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा भवेत्? अथवा कृतं सन्देहेन—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥ २३॥

अनसूया—हला प्रियंवदे! अत एव=अस्मादेव कारणात्, सस्नेहा=स्नेहयुक्ता, शकुन्तला, माधवीलतां=नवमालिकां, सिञ्चति=जलेन तर्पयति।

शकुन्तला—यतः=यस्मात् कारणात्, भगिनी=सहोदरा (निजजनककण्वपरिवर्द्धितत्वात् भगिनीरूपा इति भावः), मे=मम, भवति, ततः=तस्मात् कारणात्, किमिति=कथम्, न सिञ्चामि=जलेन न तर्पयामि।

(इति कलशं=जलपात्रम्, आवर्जयति=जलसेचनायाधोमुखं करोति।)

राजा—अपि नाम=इति सम्भावनायाम्, इयं=शकुन्तला, कुलपतेः=आश्रमाधिपस्य (अयुतशिष्यपोषकस्य) कण्वस्य, असवर्णम्=असमानं, क्षत्रियादि क्षेत्रं=कलत्रं, तत्र सम्भवः=जन्म, यस्याः सा असवर्णक्षेत्रसम्भवा=अनुलोमविवाहोत्पन्ना, भवेत्=स्यात् (यदीयं ब्राह्मणेतरजातीयपत्नीगर्भसम्भूता भवेत् तर्हि मे परिणययोग्या भवेदन्यथा शास्त्रनिषेधात् ममास्याम् अभिलाषो व्यर्थ इति भावः), अथवा, सन्देहेन=आशङ्कया, कृतम्=अलम् (अत्र सन्देहो न कर्तव्य इति भावः)—

अनसूया—सखी प्रियंवदा! इसीलिए शकुन्तला माधवीलता को स्नेहपूर्वक सींचती है।

शकुन्तला—जब यह मेरी बहन है तब भला मैं इसे क्यों नहीं सींचूँगी? **(घड़ा उडेलती है)**

राजा—तो क्या यह कुलपति कण्व की ब्राह्मणेतर पत्नी से उत्पन्न कन्या है? अथवा सन्देह करना व्यर्थ है—

निःसन्देह यह क्षत्रिय के ग्रहण करने योग्य है; क्योंकि मेरा पवित्र मन इसे चाहता है। किसी भी सन्दिग्ध विषय में सज्जनों के अन्तःकरण की प्रवृत्तियाँ ही प्रमाण होती हैं॥ २३॥

Kaṇva that whenever Mādhavī creeper blossoms untimely, then Śakuntalā's marriage will take place very soon.

Anasūyā—Dear Priyaṁvadā! Thats why Śakuntalā waters this Mādhavī creeper affectionately.

Śakuntalā—When this is my sister then why not I water it? *(pours)*

King—Can it be that this girl is sprung from a wife of the lord of sages not belonging to his own caste? or away with doubt.

तथापि तत्त्वत एवैनामुपलप्स्ये।

शकुन्तला—(ससम्भ्रमम्) अम्भ! सलिअसेअसंभवुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टदि। (इति भ्रमरबाधां नाटयति।) **[अम्भ! सलिलसेकसम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते।]**

अन्वयः—असंशयं क्षत्रपरिग्रहक्षमा यत् मे आर्यं मनः अस्यां अभिलाषि हि सन्देहपदेषु वस्तुषु सताम् अन्तःकरणप्रवृत्तयः प्रमाणम्॥ २३॥

असंशयमिति। असंशयं=नूनम्, क्षत्रस्य=क्षत्रियस्य, परिग्रहक्षमा=पत्नीत्वेन ग्रहणयोग्या, क्षत्रपरिग्रहक्षमा, यत्=यस्मात्, मे=मम, आर्यम्=साधु, श्रेष्ठम् (निषिद्धाचरणविमुखम्), मनः= अन्तःकरणम्, अस्यां=शकुन्तलायाम्, अभिलाषि=अभिलाषयुक्तमस्ति। हि=यस्मात् निश्चयेन वा, सन्देहपदेषु=संशयास्पदेषु, वस्तुषु=विषयेषु, सतां=सज्जनानाम्, अन्तःकरणस्य=मनसः, प्रवृत्तयः= प्रवर्तनानि (चेष्टा इति भावः), प्रमाणं=निर्णयहेतुः। अत्र अर्थान्तरन्यासोऽलङ्कारः, वंशस्थविल-वृत्तम्॥ २३॥

भावार्थः—नूनमियं क्षत्रियस्य पत्नीत्वेन ग्रहणयोग्या अस्ति यस्मात् मम निषिद्धाचरण-विमुखत्वेन निर्दोषम् अन्तःकरणम् अस्याम् अभिलाषयुक्तं भवति। निश्चिनोमि यत् संशयास्पदेषु विषयेषु सज्जनानां मनसः प्रवर्त्तनानि प्रमाणं भवन्ति॥ २३॥

तथापि, तत्त्वतः=सखीसकाशात् (क्षत्रपरिग्रहक्षमा अस्ति न वा—इति शब्दादिप्रमाणेन) यथार्थतः, एनां=शकुन्तलाम्, उपलप्स्ये=ज्ञास्यामि।

शकुन्तला—(ससम्भ्रमम्=सोद्वेगं) अम्भ=इति विस्मये, सलिलसेकेन=जलसेचनेन, यः सम्भ्रमः=त्वरा, तेन उद्गतः=उड्डीनः, जलसेकसम्भ्रमोद्गतः, मधुकरः=भ्रमरः, नवमालिकाम्= वनतोषिणीम्, उज्झित्वा=त्यक्त्वा, मे=मम, वदनं=मुखम्, अभिवर्तते=लक्षीकृत्याऽऽगच्छति। (इति=इत्थं, भ्रमरस्य बाधां=निराकरणं, नाटयति=अभिनयति।)

तथापि यह क्षत्रिय द्वारा विवाहने योग्य है या नहीं यह शब्दादि प्रमाण से यथार्थ रूप में मैं इसके सम्बन्ध में जानूँगा।

शकुन्तला—(घबराहट के साथ) ओह! जल डालने से विक्षुब्ध होकर यह भौंरा नवमालिका को छोड़कर मेरे मुख की ओर आ रहा है। **(इस प्रकार कहती हुई भँवरे को हटाने का अभिनय करती है।)**

Certainly she is capable of being married to a Kṣatriya, since my pure mind has a longing for her, for to the good, in doubtful matters, the inclinations of their hearts are the (deciding) authority. (23)

Never the less I shall ascertain the truth regarding her.

Śakuntalā—*(In confusion)* Oh! raised by the perturbance caused by the sprinkling of water, this bee having left the Navamālikā is coming towards my face. *(Acts to remove the bee).*

राजा—(सस्पृहं विलोक्य) साधु बाधनमपि रमणीयमस्याः।

यतो यतः षट्चरणोऽभिवर्त्तते ततस्ततः प्रेरितवामलोचना।
विवर्त्तितभ्रूरियमद्य शिक्षते भयादकामापि हि दृष्टिविभ्रमम्॥ २४॥

अपि च (सासूयमिव)—

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः।

राजा—(सस्पृहं=साभिलाषम्, विलोक्य=दृष्ट्वा), साधु=शोभनम्, बाधनम्=भ्रमर-निराकरणम्, अस्याः=शकुन्तलायाः, रमणीयम्=चित्ताह्लादकम् अस्तीति शेषः।

अन्वयः—हि षट्चरणः यतो यतः अभिवर्तते ततस्ततः प्रेरितवामलोचना (तथा) विवर्त्तितभ्रूः इयम् अकामापि भयात् अद्य दृष्टिविभ्रमं शिक्षते॥ २४॥

यतो यत इति। हि=यस्मात्, षट्चरणः=भ्रमरः, यतो यतः=यस्यां यस्यां दिशि, अभिवर्त्तते=अस्या मुखं लक्षीकृत्य भ्रमति, ततस्ततः=तस्यां तस्यां दिशि, प्रेरिते=चालिते, वामे=शोभने, लोचने=नयने, यया सा प्रेरितवामलोचना, (तथा) विवर्त्तिते=क्षणे क्षणे परिवर्त्तिते, भ्रुवौ=दृग्भ्यामूर्ध्वभागौ, यया सा विवर्त्तितभ्रूः, इयम्=शकुन्तला, अकामापि=अकारणाद् प्रवृत्तमदनापि, भयात्=षट्चरणदंशनभीत्या, अद्य=अधुना, दृष्टिविभ्रमं=दृक्पातं, शिक्षते=अभ्यसितुं प्रवर्त्तत इव। अत्र विभावनालङ्कारः, वंशस्थं नाम वृत्तम्॥ २४॥

भावार्थः—यस्मात् (जलसेकसम्भ्रमोद्गतः), भ्रमरः यस्यां यस्यां दिशि अस्या मुखं लक्षीकृत्य भ्रमति तस्यां तस्यां दिशि प्रेरितवामलोचना, परिवर्तितभ्रूरियं शकुन्तला अकारणादप्रवृत्त-मदनापि भ्रमरदंशनभीत्या अधुना दृष्टिविभ्रमं शिक्षते॥ २४॥

राजा—(लालसापूर्वक देखकर) वाह! भँवरों को हटाने की इसकी चेष्टा भी कितनी आकर्षक है (क्योंकि)—

यह भौंरा जिस-जिस ओर (दिशा में) जाता है उसी-उसी ओर यह अपने सुन्दर नेत्रों को घुमाती हैं (इसे देखकर प्रतीत होता है कि) यद्यपि यह शकुन्तला कामभावना से रहित है तथापि भँवरे के दंश के भय से आँखें नचाना सीख रही है॥ २४॥

और भी **(ईर्ष्यापूर्वक)**—

ओ भ्रमर! यद्यपि यह शकुन्तला तुझे बार-बार उड़ाती है फिर भी तू उसके चञ्चल नेत्रों को छूता है। गुप्तभाषी की भाँति इसके कानों के समीप जाकर मधुर स्वर में गुनगुनाता है

King—(Looking longingly) Her action to remove bee is also attractive—

In whichever direction the bee turns, in the same direction he turns her rolling eyes. Arching her brows, she is learning today coquettish play of her eyes through fright only and not from love.

More over *(with jealousy)*

Frequently you touch her throbbing eye with its outer corner trembling and approaching her ear, you murmur softly, as if you

करं व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती ॥ २५ ॥

अपि च— लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमाम्
माभुग्नेन विवर्तिता वलिमता मध्येन कम्रस्तनी।

अपि च (सासूयमिव=असूयासहितमिव)—

अन्वयः—मधुकर! करं व्याधुन्वन्त्याः वेपथुमतीं चलापाङ्गां दृष्टिं बहुशः स्पृशसि रहस्याख्यायीव कर्णान्तिकचरः मृदु स्वनसि, तथा रतिसर्वस्वम् अधरं पिबसि; (अत एव) वय तत्त्वान्वेषात् हताः (किन्तु) त्वं खलु कृती ॥ २५ ॥

चलापाङ्गामिति। मधुकर=हे भ्रमर! करं=हस्तम्, व्याधुन्वन्त्याः=भ्रमरनिराकरणाय इतस्ततो चालयन्त्याः, अस्याः शकुन्तलाया इति शेषः, वेपथुमतीं=त्वद्भयेन, आरोपपक्षे कामवेगेन कम्पमानाम्, (अत एव) चलौ=चञ्चलौ, अपाङ्गौ=नेत्रप्रान्तभागौ, यस्याः चलापाङ्गाम्, दृष्टिं= नयनम्, बहुशः=वारं-वारं, स्पृशसि=स्पर्शं करोषि, आरोपपक्षे चुम्बसि। रहस्यं=गोप्यम्, आख्या- तीति रहस्याख्यायी स इव रहस्याख्यायीव, कर्णान्तिकचरः=कर्णपार्श्वगामी सन्, मृदु=कोमलं मन्दं वा, स्वनसि=शब्दं करोषि, आरोपपक्षे ब्रवीषि, तथा च, रतेः=सुरतेच्छायाः, सर्वस्वं=प्रधानकारणं, रतिसर्वस्वम्=रतौ सर्वस्वमिवादरणीयम्, यद्वा रतेः=कामपत्न्याः, सर्वस्वं=युवजये परमसहायम्, अधरम्=अधरोष्ठं, पिबसि=चुम्बसि दशसि वा, (अत एव) वयम्=अहम्, तत्त्वान्वेषात्=केयम्, मम परिग्रहक्षमा न वा इत्यादितथ्यानुसन्धानात्, हताः=हतप्रायाः, वञ्चिता इति वा, किन्तु त्वम्, खलु= नूनम्, कृती=धन्यः। अत्र काव्यलिङ्गालङ्कारः, शिखरिणी वृत्तम् ॥ २५ ॥

अपि च=अन्यच्च—

अन्वयः—कम्रस्तनी इयं सभ्रूलताविभ्रमां लोलां दृष्टिं इतस्ततः वितनुते, आभुग्नेन वलिमता मध्येन विवर्त्तिता, (तथा) शीत्कारभिन्नाधरा पल्लवनिभं हस्ताग्रं विधुनोति। (अत एव) भ्रमराभि- लङ्घनभिया वाद्यैर्विना नर्तकी जाता ॥ २६ ॥

और इसके रतिसर्वस्व अधरोष्ठ के रस का पान करता है। हम तो (यह कौन है, हमारे विवाहने योग्य है या नहीं? आदि) तत्त्वानुसन्धान में लगकर असफल ही रहे—परन्तु तुम धन्य हो (जो अपने उद्देश्य में सफल रहे) ॥ २५ ॥

और भी—

सुन्दर स्तनों वाली यह शकुन्तला भ्रूविलास के साथ अपनी चञ्चल दृष्टि इधर-उधर घुमा रही है। कुछ तिरछे और त्रिवलियुक्त शरीर के मध्य भाग को बार-बार नचा-सा रही है।

---

were whispering a secret of love; and while she waves her hands, you kiss her lower lip which contains all the treasure of love's delight; while we, O bee, through search after truth are disappointed, you succeeded to gain the wish. (25)

More over—

Having charming breasts this Śakuntalā with playful movement of her eye-brows throws her fickle sight here and there

हस्ताग्रं विधुनोति पल्लवनिभं शीत्कारभिन्नाधरा
जातेयं भ्रमराभिलङ्घनभिया वाद्यैर्विना नर्त्तकी॥ २६॥

शकुन्तला—हला! परित्ताअध परित्ताअध मं इमिणा दुट्ठमहुअरेण अहिहूअमाणं। ['हला! परित्रायेथां परित्रायेथां मामनेन दुष्टमधुकरेणाभिभूयमानाम्।]

उभे—(सस्मितम्) का अम्हो परित्ताणे? एत्थ दाव दुस्सन्दं अक्कंद, जदा राअ-रक्खिदाइं तवोवणाइं। [के आवां परित्राणे? अत्र तावत् दुष्यन्तमाक्रन्द, यतो राजरक्षितानि तपोवनानि।]

लोलामिति। कम्रौ=शोभनौ, स्तनौ यस्याः सा कम्रस्तनी, इयं=शकुन्तला, भ्रुवौ लते इव तयोर्विभ्रमेण=विलासेन, सह वर्त्तत इति तां सभ्रूलताविभ्रमाम्, लोलां=चञ्चलाम्, दृष्टिं=नयनम्, इतस्ततः=यस्यां तस्यां वा दिशि, सर्वासु दिक्षु, वितनुते=विक्षिपति, आभुग्नेन=ईषद्वक्रेण, वलिमता=त्रिवलियुक्तेन, मध्येन=कटिरूपशरीरमध्यभागेन, विवर्त्तिता=परिवर्तिता (आत्मानं भ्रमरदंशनात् त्रातुमिति भावः), तथा शीत्कारेण=भयव्यञ्जकशब्देन, भिन्नौ=विश्लिष्टौ, अधरौ=ओष्ठयुगलं, यस्याः सा शीत्कारभिन्नाधरा, पल्लवनिभं=किसलयसदृशम् (रक्तवर्णं), हस्ताग्रं=कराग्रभागं, विधुनोति=कम्पयति, भ्रमरनिराकरणाय चालयति। अत एव भ्रमरेण यदभिलङ्घनं=बाधनं, तस्मात् या भीः=भयं, तया भ्रमराभिलङ्घनभिया, वाद्यैर्विना=वाद्ययन्त्रादिसाधनैर्विना, नर्त्तकी=नर्त्तकीप्राया, जाता। अत्र काव्यलिङ्गमलङ्कारः, शार्दूलविक्रीडितं नाम वृत्तम्॥ २६॥

भावार्थः—शोभनस्तनी इयं शकुन्तला सभ्रूलताविभ्रमां स्वकीयां चञ्चलां दृष्टिं इतस्ततः सर्वासु दिक्षु विक्षिपति। (आत्मानं भ्रमरदंशनात् त्रातुम्) ईषद्वक्रेण त्रिवलियुक्तेन शरीरमध्यभागेन विवर्त्तिता, तथा भयव्यञ्जकशब्देन भिन्नाधरा किसलयसदृशं हस्ताग्रं कम्पयति, अत एव भ्रमराभि-लङ्घनभिया वाद्यैर्विना नर्त्तकीप्राया जाता इति मन्ये।

शकुन्तला—हला! परित्रायेथां, परित्रायेथां इति मुग्धात्वेन कातरोक्तिः युवाम् इति भावः। माम्=शकुन्तलाम्, अनेन=दृश्यमानेन, दुष्टमधुकरेण=भ्रमरेण, अभिभूयमानाम्=व्याकुलीक्रिय-माणाम्।

भ्रमर के भय से जब यह शीत्कार करती है तब दोनों अधर अलग हो जाते हैं। पल्लव के समान लाल हाथ के अग्रभाग को भ्रमर को हटाने के लिए हिलाती है। इस प्रकार भ्रमर के दंश के भय से (उपरोक्त विभिन्न चेष्टाएँ करती हुई) यह शकुन्तला बिना बाजों के नर्तकी-सी बन गई है—ऐसा प्रतीत होता है।

शकुन्तला—सखियो! इस दुष्ट भँवरे द्वारा सताई जाती हुई मेरी रक्षा करो, रक्षा करो।

---

and turns round the middle portion of her body which is curved a little and marked with three wrinkles. By the fear of the bee her lips are separated from each other due to the sound made to express a sudden thrill of pain and also she shakes sprout like front portion of her hand to remove the bee and thus appears if she has become a dancing girl without musical instruments. (26)

Śakuntalā—Freinds! protect me, who am being attacked by this ill-behaved wicked bee.

राजा—अवसरः खल्वयमस्माकमात्मानं दर्शयितुम्। न भेतव्यं न भेतव्यम्। (इत्यर्द्धोक्ते स्वगतम्) एवं हि राजाहमिति परिज्ञानं भविष्यति। भवतु, अतिथि-समाचारमेवावलम्बिष्ये।

शकुन्तला—ण एसो दुव्विणीदो विरमदि, ता अण्णदो गमिस्सं। (पदान्तरे सदृष्टि-क्षेपम्) हद्दी! हद्दी! कधं इदो वि मं अणुसरदि, ता परित्ताअध मं। **[नैष दुर्विनीतो विरमति, तदन्यतो गमिष्यामि। हा धिक्! हा धिक्! कथमितोऽपि मामनुसरति तत् परित्रायेथां माम्।]**

उभे=अनूसया-प्रियंवदे, (सस्मितम्=ईषद्हाससहितम्), परित्राणे=भ्रमराक्रमणाद्रक्षणे, आवाम्=अनसूया-प्रियंवदे, के=अक्षमे इत्यर्थः। अत्र=अस्मिन् परित्राणावसरे, तावत्, दुष्यन्तम्=दुष्यन्तनामधेयं राजानम्, आक्रन्द=आह्वय, यतः=यस्मात्, तपोवनानि=आश्रमाणि, राजरक्षितानि भवन्ति।

राजा—अवसरः=समयः, खलु=निश्चयेन, अयम्, अस्माकम्=मदीयं, आत्मानं, दर्शयितुम्=प्रकटितुम्। न भेतव्यम्, न भेतव्यम्=भयं मा कुरु। (इत्यर्द्धोक्ते=एवं वाक्यस्यार्द्धोच्चारणं कृत्वा, स्वगतं=मनसि) एवं=उक्तप्रकारेण न भेतव्यम् इति कथनेन, हि=इति निश्चये। अहं राजा=नृपः दुष्यन्तः, इति परिज्ञानं=परिचयः, भविष्यति। (तेन प्रशान्तेऽस्मिन् तपोवने कथं प्रवेष्टव्यम्?) भवतु=अस्तु, अतिथेः=आगन्तुकस्य, समाचारं=व्यवहारं, अवलम्बिष्ये=आश्रयिष्ये।

शकुन्तला—दुर्विनीतः=दुष्टः, उद्धतः, एषः=मधुकरः, न विरमति=बाधनात् पराङ्मुखो न भवति। तत्=तस्मात्, अन्यतः=अन्यस्मिन् स्थाने, गमिष्यामि। (पदान्तरे—अन्यत् पदमिति पदान्तरं

दोनों—**(मुस्कराकर)** हम रक्षा करने वाली कौन हैं? इसके लिए राजा दुष्यन्त को पुकारो, क्योंकि तपोवन राजा द्वारा रक्षित होते हैं।

राजा—मेरे प्रगट होने का यही अवसर है। मत डरो, मत डरो। **(इतना आधा वाक्य कहकर मन में)** यदि ऐसा कहूँगा तो ये जान जायेगीं कि मैं ही राजा दुष्यन्त हूँ। अस्तु, मैं अतिथि के-से आचार का सहारा लूँगा।

शकुन्तला—यह दुष्ट नहीं रुकता (मानता), अतः मैं अन्यत्र चली जाती हूँ। **(आँखों से देखती हुई पाँव बढ़ाती है)** धिक्कार है, धिक्कार है। क्या, यह यहाँ भी मेरा पीछा कर रहा है? (तब तो) मेरी रक्षा करो, मेरी रक्षा करो।

Both—*(With a smile)* Who are we to protect? Cry out to Duṣyanta, because penance groves are to be protected by the king.

King—Here is the chance to disclose myself. Do not be afraid, do not be afraid. *(To himself when this is half said)* If I say like this then, my identity would be disclosed. Well, I will accept the manner of a stranger.

Śakuntalā— This wicked bee does not stop. I will go to another place. *(Stepping aside, and looking about her)* How, now! He is coming this way too. Save me friends; save me from this ill-mannered bee (which is following me even here).

राजा—(सत्वरमुपगम्य) आः !

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु॥ २७॥

(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः।)

सख्यौ—अज्ज! ण किंपि अच्चाहिदं किण्णु क्खु इअं पिअसहि दुट्ठमहुअरेण आउलीकिअमाणा कादरीभूदा। (इति शकुन्तलां दर्शयतः।) **[आर्य! न किमपि अत्याहितम्, किन्तु खलु इयं प्रियसखी दुष्टमधुकरेण आकुलीक्रियमाणा कातरीभूता।]**

तस्मिन् पदान्तरे=स्थानान्तरे, गत्वेति शेषः, दृष्ट्याः क्षेपः=भ्रमराधिष्ठितस्थाने, दृष्टिनिक्षेपं=दृष्टिदानं, तेन सह वर्तत इति सदृष्टिक्षेपम् (भ्रमरो विरतो न वा इति परिज्ञानार्थम्), हा धिक्! हा धिक्!=इति विषादे, कथम्, इतोऽपि=अस्मिन् स्थानेऽपि, माम्=शकुन्तलाम्, अनुसरति=अनुधावति। तत्=तस्मात्, माम्=शकुन्तलाम्, परित्रायेथाम्।

राजा—(सत्वरम्=शीघ्रम्, उपगम्य=शकुन्तलादीनां समीपं गत्वा) आः=इति कोपे।

अन्वयः—दुर्विनीतानां शासितरि पौरवे वसुमतीं शासति सति कोऽयं मुग्धासु तपस्विकन्यासु अविनयम् आचरति॥ २७॥

क इति। दुर्विनीताम्=दुष्टानाम्, शासितरि=शासनकर्त्तरि, पौरवे=पुरुवंशप्रसूते राजनि, वसुमतीं=वसुन्धराम्, शासति=पालयति सति, कोऽयम्, मुग्धासु=स्वभावसरलासु, तपस्विकन्यासु=तापसबालिकासु, अविनयम्=असदाचारम्, आचरति=व्यवहरति (स मे दण्ड्य इति भावः)। अत्र च्छेकानुप्रासः, आर्या जातिः॥ २७॥

(सर्वाः=ताः कन्याः, राजानं दृष्ट्वा किञ्चिदिव, सम्भ्रान्ताः=चकिताः भवन्ति।)

सख्यौ—आर्य्य! न किमपि अत्याहितम्=महाभीतिः, किन्तु, खलु=इति निश्चये, इयमस्माकं प्रियसखी, दुष्टमधुकरेण=दुर्विनीतषट्पदेन, आकुलीक्रियमाणा=सन्त्रासिता, व्याकुलिता सति, कातरीभूता=विक्षुब्धा जाता।

राजा—(**शीघ्रतापूर्वक उनके पास पहुँचकर**) आह! दुष्टों पर शासन करने वाले पुरुवंशी राजा के पृथ्वी पर शासन करते समय भला वह कौन दुर्विनीत है जो इन स्वभाव से सरल तपस्वी कन्याओं पर अन्याय कर रहा है?

(सब राजा को देखकर हड़बड़ा जाती हैं।)

दोनों सखियाँ—आर्य! कोई विशेष भय की बात नहीं है। किन्तु हमारी यह सखी भ्रमर द्वारा सतायी जाने से घबरा उठी है (**यह कहकर शकुन्तला को दिखाती हैं**)।

***King**—(Quickly approaching)* Oh!

While a descendant of Puru; a chastiser of the ill-mannered, governs the world, who is this that is so rude to these artless hermit girls? (27)

(All are slightly confused at the sight of the king)

Both friends—It is nothing very dreadful, respected sir, but this our dear friend was teased and frightened by the bee. *(Indicates Śakuntalā)*

राजा—(शकुन्तलामुपेत्य) अयि! तपो वर्द्धते?

(शकुन्तला ससाध्वसावनतमुखी तिष्ठति।)

अनसूया—दाणिं अदिधिविसेसलाहेण। [**इदानीम् अतिथिविशेषलाभेन।**]

प्रियंवदा—साअदं अज्जस्स। हला सउंतले! गच्छ, उडआदो फलमिस्सं अग्घभाअणं उवहर, इदंपि पाओदअं भविस्सदि। (इति घटं दर्शयति।) [**स्वागतमार्यस्य। हला शकुन्तले! गच्छ, उटजात् फलमिश्रमर्घ्यभाजनमुपहर, इदमपि पादोदकं भविष्यति।**]

राजा—भवतीनां सूनृतयैव वाचा कृतमातिथ्यम्।

राजा—(शकुन्तलामुपेत्य=निकटं गत्वा) अयि=इति कोमलसम्बोधने, तपो वर्द्धते=निर्विघ्नेन तपो वर्द्धते ननु?

(शकुन्तला, साध्वसेन=भयेन, सह वर्त्तते इति ससाध्वसा, अवनतमुखी=लज्जया नम्रमुखी, तिष्ठति।)

अनसूया—इदानीम्, विशिष्टोऽतिथिरित्यतिथिविशेषस्तस्य लाभेन=प्राप्त्या (भवल्लाभेन), तपो वर्द्धत इति पूर्वेण सम्बन्धः।

प्रियंवदा—आर्यस्य=भवतः, स्वागतम्=शुभागमनम्। हला शकुन्तले! गच्छ, उटजात्=पर्णशालायाः, फलेन मिश्रं=युक्तं, फलमिश्रम्, अर्घ्यभाजनम्=अर्घ्यपात्रम्, उपहर=आनय, इदमपि=घटस्थितजलमपि (वृक्षसेचनार्थमानीतं जलमपि), पादोदकं=पादप्रक्षालनजलं, भविष्यति। (इति=इत्युक्त्वा, घटं=जलभाण्डं, दर्शयति।)

राजा—भवतीनां, सूनृतया=सत्यया प्रियया च, वाचा=वाक्येनैव, आतिथ्यम्=अतिथि-सत्कारः, कृतं=विहितम्।

राजा—(**शकुन्तला के पास जाकर**) अयि! तुम्हारी तपस्या तो बढ़ रही है न?

(**शकुन्तला लज्जा से सिर झुकाये खड़ी रहती है।**)

अनसूया—आप जैसे विशेष अतिथि को पाकर तपस्या बढ़ ही रही है।

प्रियंवदा—आर्य का स्वागत है। सखी शकुन्तले! जाओ कुटिया से फलमिश्रित अर्घ ले आओ। (और) यह पाँव धोने के काम आ जायेगा (**घड़ा दिखाती है**)।

राजा—आप लोगों की मधुर और सत्यवाणी ने ही हमारा अतिथिसत्कार कर दिया है।

King—*(Approaching Śakuntalā)* I trust your devotion or penance prospers.

(Śakuntalā stands speechless through embarrassment).

Anasūyā—Now through the arrival of a distinguished guest like you.

Priyaṁvadā—Welcome, respected sir. Dear Śakuntalā, go to the cottage and fetch an offering mixed with fruits. This will serve as water for washing the feet. *(Points at the pitcher)*

King—The rites of hospitality have been performed by your sweet and truthful speech (words).

अनसूया—इमस्सिं दाव पच्छाअसीदलाए सत्तवण्णवेदिआए उववविसिअ अज्जो परिस्समं अवणेदु। **[अस्यां तावत् प्रच्छायशीतलायां सप्तपर्णवेदिकायामुपविश्य आर्यः परिश्रममपनयतु।]**

राजा—नूनं यूयमप्यनेन धर्मकर्मणा परिश्रान्ताः, तन्मुहूर्तमुपविशत।

प्रियंवदा—(जनान्तिकम्) हला सउंतले! उइदं णो अदिधिपज्जुवासणं, ता एहि उववविसम्ह। (इति सर्वा उपविशन्ति।) **[हला शकुन्तले! उचितं नः अतिथिपर्युपासनम्, तद् एहि, उपविशामः।]**

शकुन्तला—(आत्मगतम्) कधं इमं जणं पेक्खिअ तवोबणविरोहिणो विआरस्स गमणीअह्मि संवुत्ता। **[कथमिदं जनं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता।]**

अनसूया—तावत्=तावत्कालपर्यन्तम्, प्रकृष्टा छाया प्रच्छायं, तेन शीतला, तस्यां प्रच्छायशीतलायाम्, अस्याम्, सप्तपर्णस्य=विषमच्छदवृक्षस्य (छदौना इति भाषायाम्), वेदिकायाम्=मूलस्थचतुरस्रभूमौ, उपविश्य, परिश्रमं=मार्गश्रमम्, अपनयतु=दूरीकरोतु, आर्यः=मान्यः।

राजा—अनेन=परिदृश्यमाणेन, धर्म्मकर्मणा=जलसेचनादिरूपधर्मकार्येण, नूनं=निश्चितमेव, यूयं=भवत्यः, परिश्रान्ताः=क्लान्ताः, तत्=तस्मात्, मुहूर्तम्=किञ्चित्कालपर्यन्तम्, उपविशत।

प्रियंवदा—(जनस्य=उद्देश्यभूतजनस्य, अन्तिकम्=समीपम्, जनान्तिकम्=अनन्यबोध्यमित्यर्थः) हला शकुन्तले! नः=अस्माकम्, अतिथिपर्युपासनम्=अभ्यागतसत्कारं, उचितम्=समीचीनम्, तत्=तस्मात्, एहि=आगच्छ, उपविशामः। (इति सर्वा उपविशन्ति)

शकुन्तला—(आत्मगतम्=स्वगतम्) इमं=पुरतः स्थितम्, जनं=दुष्यन्तमिति यावत्, प्रेक्ष्य=दृष्ट्वा, तपोवनस्य=आश्रमस्य, विरोधिनः=विरुद्धस्य, विकारस्य=विकृतेः, गमनीया=प्रापणीया,

---

अनसूया—आर्य! आप भी इस सघन छाया युक्त सप्तपर्ण की वेदी पर बैठकर अपनी थकावट को मिटा लें।

राजा—निश्चय ही आप सब भी जलसिञ्चन रूपी धर्मकार्य से थक गई होंगीं। अतः आप सब भी थोड़ी देर के लिए बैठ जाइए।

प्रियंवदा—**(शकुन्तला के कान में छिपाकर)** सखी शकुन्तले! हमें अतिथि का सत्कार करना चाहिए। तो आओ बैठ जायें। **(इस प्रकार सब बैठ जाती हैं)**

शकुन्तला—**(स्वयं)** न जाने इस व्यक्ति को देखकर मैं क्यों तपोवन-विरोधी भावों का लक्ष्य बनी जा रही हूँ?

***Anasūyā*—**Then, please divert your fatigue by sitting for a while on the seat under the cool and dense shade of the Saptaparna Tree.

***King*—**Why! you also are fatigued by this holy work.

Priyaṁvadā*—*(Proximity, whispering) Dear Śakuntalā! it is proper for us to wait upon our guests. Let us sit here. *(All sit down)*

Śakuntalā*—*(To herself) How it is that having seen this person I have become susceptible to an emotion inconsistent with a penance grove.

राजा—(सर्वा अवलोक्य) अहो! समानवयोरूपरमणीयं सौहार्दमत्रभवतीनाम्।

प्रियंवदा—(जनान्तिकम्) हला अणसूए! को णु क्खु एसो दुरवगाहगंभीराकिदी महुरं आलवंतो पहुत्तदाक्खिण्णं वित्थारेदि। **[हला अनसूये! को नु खलु एष दुरवगाह-गम्भीराकृतिर्मधुरमालपन् प्रभुत्वदाक्षिण्यं विस्तारयति।]**

अनसूया—हला! मम वि अत्थि कोदूहलं, ता पुच्छिस्सं दाव णं। (प्रकाशम्) अज्जस्स महुरालाबजणिदो विस्संभो मं आलावेदि। कदरो राएसिवंसो अलंकरीअदि अज्जेण? कदमो वा देसो विरहपज्जुस्सुओ करीअदि? किं णिमित्तं वा अज्जेण सुउमारेण तवोवणगमणपरिस्समे अप्पा उवणीदोत्ति?। **[हला! ममापि अस्ति कौतूहलम्, तत् प्रक्ष्यामि तावदेनम्। आर्यस्य मधुरालापजनितो विश्रम्भो मामालापयति। कतरो राजर्षिवंशः अलंक्रियते**

कथं=केन कारणेन, संवृत्ता अस्मि=जाता अस्मि? (तपोविनाशकतया विरुद्धस्य कामवेगस्य प्रभावेन कथमहमभिभूता इव जाता इति भावः।)

राजा—(सर्वा अवलोक्य=दृष्ट्वा) अहो! इति कौतुके, अत्रभवतीनां=पूज्यानाम् (युष्माकम्), सौहार्दं=परस्परमैत्रीं, समानानि=अन्योन्यतुल्यानि, वयांसि, रूपाणि=आकृतयः स्वभावश्च, तैः रमणीयं=मनोहरम् समानवयोरूपरमणीयम्।

प्रियंवदा—(जनान्तिकम्=अनसूयापार्श्वे) हला अनसूये! को नु खलु एषः=न जाने कोऽयं महानुभावः, यः, दुःखेनावगाह्यते इति दुरवगाहा=दुष्प्रवेशा (दुर्बोधस्वभावः), गम्भीरा आकृतिर्यस्य सः गम्भीराकृतिः, मधुरं=मिष्टम्, आलपन्=कथयन्, प्रभुत्वं=प्रभावः (निग्रहानुग्रह-सामर्थ्यं), दाक्षिण्यम्=औदार्य्यम्, विस्तारयति=प्रकाशयति।

अनसूया—हला! ममापि=मम मनसि अपि, कौतूहलं=परिज्ञानार्थं जिज्ञासा, अस्ति, तत्=तस्मात्, तावत् एनं=जनं, प्रक्ष्यामि। (प्रकाशम्=सर्वश्राव्यम्) आर्यस्य=भवतः, मधुरालाप-जनितः=प्रियालापोद्भवः, विश्रम्भः=विश्वासः, माम् आलापयति=आलपितुं नियोजयति, आर्येण=

राजा—(सबको देखकर) समान आयु और रूप के कारण आपलोगों की मित्रता भी बड़ी सुन्दर प्रतीत होती है।

प्रियंवदा—(सखी से चुपके से) सखी अनसूया! ये कौन हैं? जिनकी आकृति गम्भीर और स्वभाव दुर्बोध है और जो अपनी मधुर बातों से अपनी प्रभुता और उदारता का विस्तार (प्रदर्शन) कर रहे हैं।

अनसूया—सखी! मेरे मन में भी (यह जानने का) कौतूहल है। अतः मैं इन्हीं से पूछती हूँ। **(प्रगट)** आपके मधुर आलाप से आश्वस्त होकर ढिठाई मुझे कुछ पूछने के लिए

King—(Looking at all) How charming is your friendship owing to your equal age and beauty.

Priyaṁvadā—(Aside) Anasūyā! who indeed may this be, that being and dignified in appearance and talking in a pleasing and sweet manner, appears as though endowed with majesty.

Anasūyā—Dear! I too possess the curiosity, I will just ask him. *(Aloud)* The confidence created by your sweat tongue prompts

आर्येण ? कतमो वा देशो विरहपर्युत्सुकः क्रियते ? किं निमित्तं वा आर्येण सुकुमारेण तपोवनगमनपरिश्रमे आत्मा उपनीतः ?]

शकुन्तला—(आत्मगतम्) हिअअ ! मा उत्तम्म, जं तुए चिंतिदं तं अणसूआ मंत्रेदि। **[हृदय! मा उत्ताम्य, यत् त्वया चिन्तितं तदनसूया मन्त्रयति।]**

राजा—(स्वगतम्) कथमिदानीमात्मानं निवेदयामि, कथं वात्मनः परिहारं करोमि। भवतु, एवं तावत्। (प्रकाशम्) भवति! वेदविदस्मि राज्ञः पौरवस्य नगरधर्माधिकारे नियुक्तः, पुण्याश्रमदर्शनप्रसङ्गेन धर्मारण्यमिदमायातः।

भवता, कतरः=कः, राजर्षिवंशः, अलंक्रियते=जन्मना विभूष्यते। कतमो वा देशः=बहूनां देशानां मध्ये को वा देशः, विरहेण=वियोगेन, पर्युत्सुकः=उत्कण्ठितः, क्रियते (कस्माद्देशादागतोऽसीति भावः)। किन्निमित्तं वा, सुकुमारेण=मृदुलाङ्गेन, आर्येण=मान्येन, तपोवनगमनपरिश्रमे, आत्मा= देहः, उपनीतः=उपस्थापितः (किमत्रागमनकारणमित्यर्थः)।

शकुन्तला—(आत्मगतम्) हृदय! मा उत्ताम्य=जिज्ञासया सन्तापं मा कृथाः। यत् त्वया, चिन्तितं=प्रष्टव्यत्वेन निश्चितम्, तदनसूया, मन्त्रयति=पृच्छति।

राजा—(स्वगतम्) कथं=केनोपायेन, इदानीम्=अधुना, आत्मानं निवेदयामि=स्वात्मपरिचयं ददामि, वा=अथवा, कथम्=केनोपायेन, आत्मनः=स्वस्य, परिहारं करोमि=अन्यरूपेणाभिधाय गोपनं करोमि। (किञ्चिदुपायं विचार्य) एवम्=इत्थम्, तावत्=भवतु। (प्रकाशम्) भवति इति सम्बोधने, (अहम्) वेदवित्=वेदज्ञः अस्मि (वेदज्ञब्राह्मणोऽस्मि इति भावः), तथा च

विवश कर रही है। (कृपया बताइए) आप किस राजवंश को अलंकृत करते हैं (आप किस वंश से सम्बद्ध हैं) ? किस देश को विरहोत्कण्ठित कर यहाँ पधारे हैं और आप जैसे सुकुमार व्यक्ति ने किसलिए तपोवन में आने के घोर परिश्रम में स्वयं को डाला है ?

शकुन्तला—(**मन में**) हृदय! अधिक उतावले न बनो! तुमने जो सोचा था, वही बात अनसूया पूछ रही है।

राजा—(**मन में**) अब किस प्रकार अपना परिचय दूँ अथवा किस प्रकार अपना बचाव करूँ (सच्चा परिचय छिपाऊँ)। अच्छा ऐसे ही सही। (**प्रगट**) आर्ये ! मैं वेदज्ञ विद्वान् तथा नगरधर्माधिकार पर नियुक्त धर्माधिकारी हूँ। पावन आश्रमों के दर्शन प्रसङ्ग में इधर-उधर घूमता हुआ इस पुनीत तपोवन में आ पहुँचा हूँ।

---

me to speak which family of royal sages is adorned by you? Which country and its people you have distressed through separation from you? For what reason has yourself, though very delicate, been subjected to the fatigue of a visit to the penance grove?

Śakuntalā—*(Aside or to herself)* O my heart, don't be uneasy. This Anasūyā speaks your very thoughts.

King—*(To himself)* How shall I disguise myself now? Well, I will speak to her thus. *(Aloud)* Respected Madam! I am the person appointed by the king, the descendent of Puru, to supervise religious rites, and have arrived at this penance grove to ascertain

अनसूया—अज्ज सणाधा धम्मआरिणो। [**अद्य सनाथा धर्मचारिणः।**]

(शकुन्तला लज्जां नाटयति।)

सख्यौ—(उभयोराकारं विदित्वा) हला सउंतले! जइ अज्ज तादो इध सण्णिहिदो भवे····। [**हला शकुन्तले! यदि अद्य तात इह सन्निहितो भवेत्**····।

शकुन्तला—तदो किं भवे? [**ततः किं भवेत्?**]

सख्यौ—तदो जीविदसव्वस्सेण वि इमं अदिधिविसेसं कदत्थं करेदि। [**ततो जीवितसर्वस्वेनापि इमम् अतिथिविशेषं कृतार्थं करोति।**]

पौरवस्य=पुरुवंशोद्भवस्य राज्ञः दुष्यन्तस्य, नगराणि=राज्यानि (पुराणि), धर्माः=प्रजापालनादयः शौचाचारादयो वा, तेषामधिकारे=नगरधर्माधिकारे, नियुक्तः=व्यापारितः, पुण्याश्रमाणां=पावनाश्रमाणां, दर्शनप्रसङ्गेन=पर्य्यवेक्षणप्रसङ्गेन, इदं धर्मारण्यं=तपोवनम्, आयातः=आगतः। (अन्यत्र मृगयाकरणावसरे आश्रममृगमनुधावन् कतिचिद्वैखानसैरनुरोधकारणात् पुण्याश्रमदर्शनप्रसङ्गेनेदं धर्मारण्यमागतः।)

अनसूया—अद्य, धर्मचारिणः=धर्माचरणतत्पराः, नाथेन=प्रभुणा, सह वर्त्तमाना इति सनाथाः (भवदागमनेन कृतार्थाः)।

शकुन्तला—(शृङ्गारलज्जां=मदनजनितलज्जासूचकबहिर्विकारम्, नाटयति=अभिनयति)।

सख्यौ—(उभयोः=राज्ञः शकुन्तलायाश्च, आकारं=भावसूचकमुखलक्षणं, विदित्वा=अवगम्य) हला शकुन्तले! यदि अद्य तातः=कण्वः, इह=अत्र (अस्मिन्नाश्रमे), सन्निहितः=उपस्थितो भवेत्?

शकुन्तला—ततः=तदा, किं भवेत्?

अनसूया—आज धर्मचारी लोग (धर्माचरण करने वाले) सनाथ हो गये।

(शकुन्तला शृंगार-लज्जा का अभिनय करती है।)

सखियाँ—(**राजा और शकुन्तला के आकार को जानकर**) सखी शकुन्तला! यदि आज पिता कण्व यहाँ होते तो····

शकुन्तला—तब क्या होता?

सखियाँ—तब तो अपने जीवन का सर्वस्व (अर्थात् तुम्हें) देकर इस विशेष अतिथि को कृतार्थ कर देते।

---

whether the religious rites suffer any obstruction or in course of visiting holy places, by chance I have reached over here i.e. in this pure (holy) penance grove.

Anasūyā—Now the people engaged in acts of piety have found some one to take care of them.

Śakuntalā—*(Acts amorous bashfulness)*

The two friends—*(Observing the demeanour of both of them)* Dear Śakuntalā, if the father were here today...?

Śakuntalā— What would happen then?

शकुन्तला—(सकृतककोपम्) अवेध, तुम्हे किंपि हिअए कदुअ मंतेध, ण वो वअणं सुणिस्सं। [**अपेतम्, युवां किमपि हृदये कृत्वा मन्त्रयथः, न वां वचनं श्रोष्यामि।**]

राजा—वयमपि भवत्योः सखीगतं किञ्चित् पृच्छामः।

सख्यौ—अज्ज! अणुग्गहे वि अब्भत्थणा! [**आर्य! अनुग्रहेऽपि अभ्यर्थना।**]

राजा—तत्रभवान् कण्वः शाश्वते ब्रह्मणि वर्त्तते, इयञ्च वः सखी तस्यात्मजा, कथमेतत्?

सख्यौ—ततः=तदा, जीवितस्य सर्वस्वं=दारापत्यादिरूपं द्रविणं, तेन, तस्य हि कस्मैचिददेयत्वाज्जीवितसर्वस्वेन, अपि, अथवा जीवितस्य=आत्मनो जीवनस्य, सर्वस्वेनापि=सर्वसम्पत्तिस्वरूपेणापि वस्तुना (त्वया=शकुन्तलया इति भावः) इमम्=लोकोत्तरगुणविशिष्टम्, अतिथिविशेषम्=विलक्षणं अतिथिं, कृतार्थं=सफलमनोरथं, करोति=विदधाति करिष्यति (तदा अतिथये त्वां दत्त्वाऽऽत्मानमानन्दयेदिति)।

शकुन्तला—(कृत्रिमकोपेन सहेति सकृतककोपं तद् सकृतककोपम्) अपेत=दूरमपसरत, युवां, किमपि=यथा रोचते तथैव (मत्परिणयविषयम्), हृदये कृत्वा=अभिसन्धाय, मन्त्रयथः=कथयथः, वां=युवयोः, वचनं न श्रोष्यामि=असम्बद्धप्रलापित्वाद् न आकर्णयिष्यामि।

राजा—वयमपि=अहमपि, भवत्योः=युवयोः, सखीगतं=शकुन्तलासम्बद्धम्, किञ्चित् पृच्छामः=ज्ञातुमिच्छामः।

सख्यौ—आर्य! अनुग्रहेऽपि=अनुग्रहपदेऽपि, अभ्यर्थना=प्रार्थना (क्रियते)। (भवद्विधानामस्मद्विधासु प्रश्नोऽनुग्रह एव, अत एव प्रार्थना कथमपि नोपयुज्यते इति भावः।)

राजा—तत्रभवान्=पूज्यः, कण्वः=महर्षिः, शाश्वते=नित्ये, ब्रह्मणि=ब्रह्मचर्यव्रते, वर्त्तते, इयं च, वः=युष्माकम्, सखी=शकुन्तला, तस्य=महर्षेः (कण्वस्य), आत्मजा=तनया, एतत् कथम्=केन प्रकारेण?

शकुन्तला—(**बनावटी क्रोध से**) हटो, तुम दोनों अपने मन में कुछ-कुछ विचार कर इस प्रकार कहती हों, अतः मैं तुम्हारी बात नहीं सुनूँगी।

राजा—हम भी आपकी सखी के सम्बन्ध में कुछ पूछना चाहते हैं?

सखियाँ—आर्य! कृपा करने के लिए भी प्रार्थना?

राजा—पूज्य महर्षि कण्व तो नैष्ठिक ब्रह्मचारी हैं और यह आपकी सखी उनकी पुत्री है—यह भला कैसे?

The two friends—He would make this distinguished guest satisfied, even if it took the most valuable possession of his life.

Śakuntalā—Go to! you form some absurd motion in your mind and speak. I will not listen to you.

King—We also want to ask something about your friend.

Friends—This request is a veritable favour.

King—It is known that his reverence Kaṇva observes perpetual celibacy. How is it that this your friend is his daughter?

अनसूया—सुणादु अज्जो। अत्थि को वि कोसिओ त्ति गोत्तणामहेओ महाप्पहावो राएसी। [**शृणोतु आर्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः।**

राजा—स खलु भगवान् कौशिकः।

अनसूया—तं सहीए पहवं अवगच्छ। उज्झिदाए सरीरसंबड्ढणादिहिं उण तादकण्णो वि एदाए पिदा। [**तं सख्याः प्रभवमगच्छ। उज्झितायाः शरीरसंवर्द्धनादिभिः पुनस्तातकण्वोऽपि एतस्याः पिता।**]

अनसूया—शृणोतु आर्य्यः=मान्यः शृणोतु। अस्ति कोऽपि, कुशिकस्यापत्यं पुमान् कौशिकः, इति=इत्थं, गोत्रनामधेयः=वंशानुभावकनामधेयः। महाप्रभावः=महातेजाः, राजर्षिः=क्षत्रियतपस्वी (विश्वामित्रः)।

राजा—सः=प्रसिद्धः, भगवान्=लोकातीतमाहात्म्ययुक्तः, कौशिकः=विश्वामित्रः (यः जन्मना क्षत्रियोऽपि स्वमाहात्म्येन ब्राह्मणत्वमापेति भावः)।

अनसूया—तं=कौशिकं, सख्याः=शकुन्तलायाः, प्रभवं=जन्मकारणं (जनकम्), अवगच्छ=जानीहि, उज्झितायाः=त्यक्ताया अस्याः, शरीरस्य=देहस्य, संवर्द्धनादिभिः= परिपोषणादिभिः, पुनरित्यविशेषे, तातकण्वोऽपि=जनककण्वोऽपि, एतस्याः=शकुन्तलायाः, पिता=जनकः (धर्मपितेति भावः)।

राजा—उज्झितः=त्यक्तः, इति शब्देन, नः=अस्माकम्, कुतूहलम्=कौतुकम्, आश्चर्यम् (जिज्ञासा इति यावत्), जनितम्=उत्पादितं, तत्=तस्मात्, आमूलात्=आदित आरभ्य, श्रोतुं=आकर्णयितुं, इच्छामः=वाञ्छामः।

अनसूया—आर्य! सुनिए, कौशिक नामक गोत्र और नाम वाले कोई बड़े भारी राजर्षि हुए हैं, जो अमित प्रभावशाली थे।

राजा—हाँ, वे भगवान् कौशिक थे।

अनसूया—उन्हें ही मेरी सखी का पिता समझें। परित्यक्त (इस शकुन्तला) के पालन-पोषण-संवर्द्धन के लिए महर्षि कण्व भी इसके पिता हैं।

राजा—'त्याग दिया' इस शब्द ने मेरे हृदय में कुतूहल जगा दिया है, अतः आरम्भ से इस सम्बन्ध में जानना चाहता हूँ।

***Anasūyā*—**Honourable sir, please hear. There was a certain royal sage of great majesty whose family name is Kaushika.

***King*—**There is, I know.

***Anasūyā*—**Know him to be the progenitor of our friend. Father Kaṇva is her father by reason of his fostering (nourishing) her body etc. when she was deserted.

***King*—** The word "deserted or (emitted)" has excited my curiosity. I wish to hear from the very beginning.

राजा—उज्झितशब्देन जनितं नः कुतूहलम्। तदामूलाच्छ्रोतुमिच्छामः।

अनसूया—सुणादु अज्जो। पुरा किल तस्स राएसिणो उग्गे तवसि वत्तमाणस्स कधंपि जादसंकेहिं देवेहिं मेणआ णाम अच्छरा णिअमविग्घआरिणि पेसिदा। **[शृणोतु आर्यः। पुरा किल तस्य राजर्षेरुग्रे तपसि वर्त्तमानस्य कथमपि जातशङ्कैः देवैः मेनका नाम अप्सरा नियमविघ्नकारिणी प्रेषिता।]**

राजा—अस्त्येवान्यसमाधिभीरुत्वं देवानाम्। ततस्ततः ?

अनसूया—तदो वसंतावदाररमणीए समए उम्मादहेदुअं ताए रूवं पेक्खिअ····। (इत्यर्धोक्ते लज्जां नाटयति।) **[ततो वसन्तावताररमणीये समये उन्मादहेतुकं तस्या रूपं प्रेक्ष्य····।**

अनसूया—आर्यः=मान्यः, शृणोतु=आकर्णयतु, पुरा=अतीते काले, किलेति=परम्परागत-लोकवार्त्तायाम्, तस्य=पूर्वोक्तस्य, राजर्षेः=विश्वामित्रस्य, उग्रे=उत्कटे, तपसि=नियमे, वर्त्तमानस्य=तदाचरत इत्यर्थः, कथमपि=केनाऽपि हेतुना, जातशङ्कैः=जातभयैः, देवैः, नियमस्य=तपसः, विघ्न-कारिणी=भङ्गकारिणी, मेनका नाम अप्सरा=इति नाम्ना प्रसिद्धा सुराङ्गना, प्रेषिता=प्रेरिता प्रहिता वा।

राजा—देवानाम्=इन्द्रादीनाम्, अन्येषां यः समाधिः=तपोनियमः, तस्माद् भीरुत्वम्=भयशीलत्वम्, अस्त्येव=वर्तते खलु। ततस्ततः=तदा किमभूत् ?

अनसूया—तदा, वसन्तस्य=मधुऋतोः, अवतारेण=प्रवृत्त्या, रमणीयः=मनोहरः, तस्मिन् समये=वसन्तावताररमणीये समये, उन्मादहेतुकम्=चित्तविभ्रमहेतुभूतम् (कामोद्दीपकम्), तस्याः=मेनकायाः, रूपं=सौन्दर्यम्, प्रेक्ष्य=दृष्ट्वा, (इत्यर्द्धोक्ते—तया सह रन्तुं प्रवृत्तो राजर्षिर्गर्भमजनयदिति वाक्यशेषस्य प्रेक्ष्येत्यन्तमर्द्धम्, लज्जां नाटयति=अभिनयति)

अनसूया—आर्य! सुनिये, बहुत पहले जब वे राजर्षि उग्र तपस्या में संलग्न थे, किसी कारण शङ्कित होकर देवताओं ने तपस्या में विघ्न डालने वाली मेनका नामक अप्सरा को भेजा।

राजा—दूसरों की समाधि (तपस्या) देखकर देवताओं को भय होता ही है। फिर क्या हुआ ? (अर्थात् दूसरों के तप से भयभीत होना देवताओं का स्वभाव ही है।)

अनसूया—इसके बाद वसन्तऋतु के प्राकट्य से रमणीय काल में कामभावना जगाने वाले उसके मादक रूप को देखकर···· **(इतना आधा ही कहकर लज्जा का अभिनय करती है।)**

***Anasūyā*—**Your honour! please hear. Formerly, they say, to that royal sage, who was practising rigorous penance, was sent by the gods, who some how grew alarmed, a nymph named Menakā to cause obstacles to his vows.

***King*—**There is this dread of the gods regarding other's practice of penance.

***Anasūyā*—**Then, in the pleasant time of spring season, having seen her intoxicating form. *(stops through bashfulness when half said)*

राजा—पुरस्तादवगम्यत एव सर्वथा अप्सर:सम्भवैषा।

अनसूया—अध इं? **[अथ किम्?]**

राजा—उपपद्यते—

मानुषीभ्यः कथं नु स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥ २८॥

(शकुन्तला सव्रीडाऽधोमुखी तिष्ठति।)

राजा—पुरस्तात्=अग्रतः, अवगम्यते=ज्ञायते, एव (अत एकवाचा कथनमनावश्यक-मिति भावः), एषा=शकुन्तला, सर्वथा=पूर्णतः, अप्सर:सम्भवा=अप्सरोगर्भसम्भूता एव नास्त्यत्र सन्देहलेशावसरः।

अनसूया—अथ किम् इत्यङ्गीकारे (स्वीकरोमीत्यर्थः)।

राजा—उपपद्यते=युज्यते (अस्या अप्सर:सम्भवत्वमुपपद्यते), यतः—

अन्वयः—मानुषीभ्यः अस्य रूपस्य कथं नु सम्भवः स्यात्। प्रभातरलं ज्योतिः वसुधातलात् न उदेति॥ २८॥

मानुषीभ्य इति। मानुषीभ्यः=नानाविधमानवजातिस्त्रीभ्यः, अस्य=दृश्यमानस्य (शकुन्तलाया इति भावः), रूपस्य=सौन्दर्यस्य आकृतेर्वा, कथं नु सम्भवः=समुद्भवः, स्यात्, न कथमपीत्यर्थः। (यथा) प्रभया=त्विषा, तरलं=भास्वरं, प्रभातरलम्, ज्योतिः=तेजः, वसुधातलात्=भूतलात्, न उदेति=नोत्पद्यते। अत्र प्रतिवस्तूपमालङ्कारः, पथ्यावक्त्रं वृत्तम्॥ २८॥

भावार्थः—यथा त्विषा भास्वरं ज्योतिः भूतलात् नोत्पद्यते तथैव शकुन्तलायाः दृश्यमानस्यास्य सौन्दर्यस्य मानुषीभ्यः कथं नु समुद्भवः स्यात्? (न कथमपीत्यर्थः)॥ २८॥

(शकुन्तला सव्रीडा=सलज्जा, अधोमुखी=नम्रमुखी तिष्ठति।)

राजा—आगे की घटना तो सहज ही समझ में आ जाती है, तो यह पूर्णतः अप्सरा के गर्भ से उत्पन्न हुई है?

अनसूया—और क्या? (अर्थात् आप का अनुमान सही है)

राजा—ठीक है—

मनुष्य जाति की स्त्री से भला ऐसे रूप का जन्म कैसे सम्भव है? प्रकाश से तरल ज्योति (विद्युत्) पृथ्वी से नहीं उत्पन्न हुआ करती। २८॥

(शकुन्तला लज्जापूर्वक मुख नीचा किये रहती है।)

King—The sequel is quite understood. Verily she is born of a nymph.

Anasūyā—Exactly.

King—That is proper—"How could the rise of such form take place amongst mortal females? The flash, tremulous with lustre, does not spring from the surface of the earth. (28)

(Śakuntalā stands with her face hung down)

राजा—(आत्मगतम्) हन्त! लब्धावकाशो मे मनोरथः।

प्रियंवदा—(सस्मितं शकुन्तलां विलोक्य) पुणो वि वत्तुकामो विअ अज्जो लक्खीअदि। [**पुनरपि वक्तुकाम इव आर्यो लक्ष्यते।**]

(शकुन्तला सखीमङ्गुल्या तर्जयति।)

राजा—सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम्।

प्रियंवदा—तेण हि अलं विआरिदेण, अणिज्जंतणाणुजोओ क्खु तवस्सिजणो। [**तेन हि अलं विचारितेन, अनियन्त्रणानुयोगः खलु तपस्विजनः।**]

राजा—(आत्मगतम्) हन्तेति हर्षे, लब्धः=प्राप्तः, अवकाशः=अवसरः, प्रवेशद्वारं वा, येन सः लब्धावकाशः, मे=मम, मनोरथः=अभिलाषः।

प्रियंवदा—(सस्मितम्=ईषद्हाससहितं, शकुन्तलां=स्वसखीं, विलोक्य=दृष्ट्वा) पुनरपि= अन्यदपि, वक्तुकामः=कथनेच्छुरिव, आर्य्यः=भवान्, लक्ष्यते=प्रतीयते।

(शकुन्तला सखीम्=प्रियंवदाम्, अङ्गुल्या=तर्जन्या (सङ्केतेन वा), तर्जयति=भर्त्सयति।)

राजा—सम्यक्=यथार्थम्, उपलक्षितम्=उन्नितम् (ज्ञातम्), भवत्या=त्वया, सच्चरितस्य= सदाचारस्य, श्रवणलोभात्=श्रवणौत्सुक्यात्, नः=अस्माकं, अन्यदपि=अपरञ्च, प्रष्टव्यम्=जिज्ञास्यम्, अस्ति।

प्रियंवदा—तेन हि=प्रष्टव्यान्तरसद्भावेनैव हेतुना, विचारितेन=विचारेण, अलम्=पर्याप्तम् (यथेच्छया प्रष्टव्यमिति भावः), नियन्त्रणा=देशकालादिभिर्निर्दिष्टनियमः, न विद्यते नियन्त्रणा=

राजा—(**मन में**) मेरी इच्छा को प्रवेशद्वार मिल गया है (इच्छापूर्ति का अवसर हाथ आ गया)।

प्रियंवदा—(**मुस्कान सहित शकुन्तला को देखकर**) जान पड़ता है, अभी आप और कुछ कहना चाहते हैं।

(शकुन्तला सखी को अङ्गुली के संकेत से डाँटती है।)

राजा—आपने ठीक अनुमान लगाया। आप लोगों के सुन्दर चरित्र को जानने के लोभवश हमें अभी कुछ और जानना शेष है।

प्रियंवदा—तब तो अधिक सोच-विचार करने की आवश्यकता नहीं; क्योंकि तपस्वियों से कुछ पूछने के लिए कोई विशेष नियम नहीं रहता।

***King**—(To himself)* My desire has found a way.

***Priyaṁvadā**—(Smilingly looking at Śakuntalā)* Your honour looks as though desirous of speaking again?

(Śakuntalā rebukes her frined with her figner)

King—Your guess is correct. From an eagerness to hear the deeds of the good, there is still something to be asked by us (me).

Priyaṁvadā—Enough of deliberating. Ascetic people may surely be questioned without any reserve.

राजा—एतत् पृच्छामि—

वैखानसं किमनया व्रतमा प्रदानाद्
व्यापाररोधि मदनस्य निषेवितव्यम्।
अत्यन्तमेव सदृशेक्षणवल्लभाभि
राहो निवत्स्यति समं हरिणाङ्गनाभिः॥ २९॥

प्रियंवदा—अज्ज! धम्माअरणपरवसो एस जणो, गुरुणो उण से अणुरूअवरप्पदाणे संकप्पो। [**आर्य! धर्माचरणपरवश एष जनः, गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः।**]

दोकालादिभिर्निश्चितनियमः, यस्मिन् सः अनियन्त्रणः, अनुयोगः=प्रश्नः, यस्मिन् सः तथाभूतः, खलु=इति निश्चयेन, तपस्विजनः=मुनिजनः (मुनिजनस्य विकाररहितत्वात् तेषां सन्निधावनियमेनैव सर्वं प्रष्टुमर्हसि)।

राजा—एतत्=वक्ष्यमाणम्, पृच्छामि=ज्ञातुमिच्छामि।

अन्वयः—अनया आ प्रदानात् मदनस्य व्यापाररोधि वैखानसे किं निषेवितव्यम् आहो सदृशेक्षणवल्लभाभिः हरिणाङ्गनाभिः समम् अत्यन्तमेव निवत्स्यति॥ २९॥

वैखानसमिति। अनया=शकुन्तलया, आ प्रदानात्=योग्यवराय प्रदानपर्यन्तम्, मदनस्य=कामस्य, व्यापारः=व्यवहारः, तं रुणद्धि=परिहरतीति, तत् व्यापाररोधि, वैखानसं=तापसं व्रतं, किं निषेवितव्यम्=पालयितव्यम्? आहो=अथवा, सदृशे=स्वसमाने, ईक्षणे=नयने, यासां ताः, अत एव वल्लभाः=प्रियाः, ताभिः सदृशेक्षणवल्लभाभिः, हरिणाङ्गनाभिः=मृगीभिः, समं=सह, अत्यन्तमेव=सातिरेकमेव (यावज्जीवमेव), निवत्स्यति=स्थास्यति (तपोवने इति)। इयं भवदीया प्रियसखी किमुपकुर्वाणं ब्रह्मचर्ये तिष्ठत्यथ नैष्ठिकब्रह्मचर्ये वेति भावः।) अत्र परिकरालङ्कारः, वसन्ततिलकं वृत्तम्॥ २९॥

भावार्थः—अनया शकुन्तलया स्वपरिणयपर्यन्तं मदनस्य व्यापाररोधि तापसं व्रतं पालयितव्यं किम्? अथवा एषा सदृशेक्षणवल्लभाभिः मृगीभिः सह यावज्जीवमेव तपोवनमध्ये स्थास्यति किम्?॥ २९॥

राजा—मैं यह पूछता हूँ—

यह आपकी सखी विवाहपर्यन्त ही इस प्रकार ब्रह्मचर्यव्रत धारण किये रहेगी अथवा समान नेत्र होने से प्रिय हरिणबन्धुओं के साथ जन्मभर (यहीं वन में) निवास करती रहेगी।

प्रियंवदा—आर्य यह व्यक्ति तो धर्मानुष्ठान के अधीन है, किन्तु पिता कण्व का विचार तो इसे किसी अनुरूप वर को प्रदान करने का है।

King—I wish to ascertain this (about your friend)—

Is the ascetic vow, which obstructs the operation of love, to be observed by her until she is given away in marriage or will she dwell even to the end (of her life) along with the female deer that are her favourites owing to their similar eyes? (29)

Priyaṁvadā—Sir, even in the practice of religious duties this person is dependent on another. But it is her father's earnest desire to give her hand to a suitable bridegroom.

राजा—(सहर्षमात्मगतम्)

भव हृदय! साभिलाषं सम्प्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्॥ ३०॥

शकुन्तला—(सरोषमिव) अणसूए? अहं गमिस्सं। [**अनसूये! अहं गमिष्यामि।**]

अनसूया—किं णिमित्तं? [**किं निमित्तम्?**]

प्रियंवदा—आर्य! एष जनः=शकुन्तला, धर्माचरणस्य=धर्मानुष्ठानस्य, परवशः=अधीनः (अत एवाऽधर्मं नोपायातुमर्हति), पुनः=किन्तु, अस्याः=शकुन्तलायाः, गुरोः=पितुः कण्वस्य, अनुरूपाय=तुल्यरूपगुणशालिने, वराय, प्रदाने=समर्पणे, सङ्कल्पः=मनोभिलाषोऽस्ति। अर्थात् आ प्रदानादनया वैखानसं व्रतं निषेवितव्यम्।

राजा—(सहर्षम्=हर्षसहितम्, आत्मगतम्=मनसि)

अन्वयः—हे हृदय! साभिलाषं भव, सम्प्रति सन्देहस्य निर्णयः जातः यत् अग्निम् आशङ्कसे तत् इदं स्पर्शक्षमं रत्नम् (अस्ति इति शेषः) ॥ ३०॥

भवेति। हे हृदय! साभिलाषं=शकुन्तलाप्राप्तिविषये गृहीतसङ्कल्पं, भव (यथेच्छमेनां अभिलष), सम्प्रति=इदानीम्, सन्देहस्य=इयं क्षत्रियपरिग्रहक्षमा न वेति विषयकसन्देहस्य तथा किमुपकुर्वाणा नैष्ठिकी ब्रह्मचारिणी वेति संशयस्य, निर्णयः=निश्चयः, जातः। यत्=शकुन्तलारूपं वस्तु, अग्निम्=अग्नितुल्यं (स्पर्शानर्हम्), इति आशङ्कसे=संशयं करोषि, तत्=शङ्कितम्, इदं= शकुन्तलारूपं वस्तु, स्पर्शक्षमम्=स्पर्शार्हम्, रत्नं=मणिस्वरूपं जातम्। अत्र काव्यलिङ्गमलङ्कारः, आर्या जातिः ॥ ३०॥

भावार्थः—हे हृदय! इदानीं यथेच्छमेनां अभिलष, सम्प्रति सन्देहस्य निर्णयः जातः। यत् पुरा अग्निम् इत्याशङ्कसे तदिदं स्पर्शक्षमं रत्नमेव। (अप्सरःसम्भवत्वात् राजर्षिबीजभूतत्वाच्च अब्राह्मणीरूपोपकुर्वाणा परिणययोग्येति अस्याः परिग्रहे पापं न भविष्यतीति भावः।) ॥ ३०॥

शकुन्तला—(सरोषमिव=सकोपमिव) अहं=शकुन्तला, गमिष्यामि=व्रजिष्यामि।

अनसूया—किं निमित्तं=केन कारणेन? कस्माद्धेतोः? गमिष्यसीत्यर्थः।

राजा—(**हर्षपूर्वक मन में**)

हे हृदय! (अब) तुम अभिलाषायुक्त बनो; क्योंकि अब सन्देह (क्षत्रिया है या नहीं तथा नैष्ठिक ब्रह्मचारिणी तो नहीं-विषयक) भी निवृत्त हो गया है। जिसे तुम (अब तक) अग्नि समझ रहे थे वह स्पर्श योग्य रत्न निकला॥ ३०॥

शकुन्तला—(**कुछ क्रुद्ध-सी होकर**) अनसूया! मैं जा रही हूँ।

अनसूया—भला क्यों (किसलिए)?

King—(With pleasure to himself)

My heart, be hopeful, for now all doubt is over. What you dreaded as fire, the same is a gem capable of being touched.

Śakuntalā—(Feigning anger) Anasūyā! I am going.

***Anasūyā*—**What for?

शकुन्तला—इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए गदुअ णिवेदइस्सं। (इत्युत्तिष्ठति) **[इमामसम्बद्धप्रलापिनीं प्रियंवदाम् आर्यायै गौतम्यै गत्वा निवेदयिष्यामि।]**

अनसूया—सहि! ण जुत्तं अस्समवासिणो जणस्स अकिदसक्कारं अदिधिविसेसं उज्झिअ सच्छंददो गमणं। **[सखि! न युक्तमाश्रमवासिनो जनस्य अकृतसत्कारमतिथिविशेषम् उज्झित्वा स्वच्छन्दतो गमनम्।**

(शकुन्तला उत्तरमदत्त्वैव प्रस्थिता।)

राजा—(स्वगतम्) कथमियं गच्छति। (जिघृक्षुरिव पुनरिच्छां निगृह्य) अहो! चेष्टानुरूपिणी कामिजनचित्तवृत्तिः। अहं हि—

शकुन्तला—इमाम्, असम्बद्धप्रलापिनीम्=असङ्गतभाषिणीम्, प्रियंवदाम्, आर्य्यायै=माननीयायै, गौतम्यै=गौतमी नाम कण्वमहर्षेः धर्मभगिनी तस्यै, गत्वा=प्राप्य, निवेदयिष्यामि=ज्ञापयिष्यामि। (इति=एवमुक्त्वा, उत्तिष्ठति)

अनसूया—सखि!=शकुन्तले! अकृतः सत्कारः=पूजा, यस्य तम् अकृतसत्कारं, अतिथिविशेषम्=अतिथिरूपेणात्र आगतं राजानम्, उज्झित्वा=त्यक्त्वा, स्वच्छन्दतः=स्वाभिप्रायतः, गमनं=पलायनम्, आश्रमवासिनो जनस्य=तपोवनगतस्य जनस्य कृते, न युक्तम्=न सङ्गतम्।

(शकुन्तला—उत्तरं=प्रतिवचनम्, अदत्त्वैव=नोक्त्वैव, प्रस्थिता=निष्क्रान्ता।)

राजा—(स्वगतम्) इयं=शकुन्तला, कथं=सविषादसम्भ्रमव्यञ्जकः शब्दः, गच्छति= न गच्छत्विति **भावः**। (जिघृक्षुरिव=ग्रहीतुमिच्छुरिव, पुनः=भूयः, इच्छाम्=जिघृक्षाम्, निगृह्य=बलपूर्वकं दमयित्वा) अहो=आश्चर्यम्, कामिजनस्य=कामाधीनस्य लोकस्य, चित्तवृत्तिः=इच्छा, चेष्टानुरूपिणी=शरीरकृतव्यापारतुल्यरूपा भवतीति शेषः।

शकुन्तला—इस असम्बद्ध (ऊट-पटाँग) बात करने वाली प्रियंवदा के सम्बन्ध में जाकर आर्या गौतमी से निवेदन करूँगी **(उठ खड़ी होती है)**।

अनसूया—सखी! असत्कृत विशेष अतिथि को इस प्रकार (बिना स्वागत किये) छोड़कर इच्छानुसार चल देना आश्रमवासी जनों के लिए उचित नहीं है।

(शकुन्तला बिना उत्तर दिये चली जाती है।)

राजा—**(मन में)** क्या यह जा रही है? **(पकड़ने की कामना करते हुए, फिर इच्छा को दबाकर)** आश्चर्य की बात है, कामीजनों की चित्तवृत्ति भी बाहरी घटनाओं के अनुरूप ही होती है। क्योंकि मैं ही—

Śakuntalā—I am going to tell the venerable Gautamī how impertinertly Priyaṁvadā has been prattling.

Anasūyā—Dear Śakuntalā, it is not proper for a person of this penance grove to leave at will, before the rites of hospitality are done to an honoured guest.

(Śakuntalā exits with out saying any thing).

King—*(To himself)* Is she really going? *(Wishing to detain her then checking himself)* Ah! the state of a lovers mind is an exact reflection of bodily movement. For I,

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः।
स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥ ३१॥

प्रियंवदा—(शकुन्तलामुपेत्य) हला चंडि! णारिहसि गंतुं। [हला चण्डि! नार्हसि गन्तुम्।]

शकुन्तला—(परिवृत्य सभ्रूभङ्गम्) किं त्ति? किमिति?

हि=यस्मात्, अहम्=दुष्यन्तः (अहमित्यस्य स्वस्थानाच्चलन्नपि गत्वेव प्रतिनिवृत्तः इति श्लोकस्थेनान्वयः)—

अन्वयः—मुनितनयाम् अनुयास्यन् सहसा विनयेन वारितप्रसरः (सन्) स्वस्थानात् अचलन्नपि गत्वा पुनः प्रतिनिवृत्तः इव (अस्मीति शेषः)॥ ३१॥

अनुयास्यन्निति। मुनितनयां=कण्वदुहितां शकुन्तलाम्, अनुयास्यन्=दर्शनलोभात् अनुगमिष्यन्, सहसा=हठात्, विनयेन=जितेन्द्रियतया, वारितः=निषिद्धः, प्रसरः=आवेगः (गतिः), यस्य सः वारितप्रसरः सन्, अत एव, स्वस्थानात्=स्वाध्युषितप्रदेशात्, अचलन्नपि=पदमेकम-गच्छन्नपि, गत्वा पुनः प्रतिनिवृत्तः=प्रत्यागत इव अस्मि। अत्र क्रियोत्प्रेक्षा तथा 'अचलन्नपि गत्वा' इति विरोधाभासश्चालङ्कारौ। आर्या जातिः॥ ३१॥

भावार्थः—अहं कण्वदुहितां शकुन्तलां बलवत्तद्दर्शनलोभात् अनुगमिष्यन् (स्वस्वरूपं स्थानविशेषं च अनादृत्य) हठात् विनयेन वारितः। अत एव स्वाध्युषितप्रदेशात् पदमेक-मगच्छन्नपि, गत्वा पुनः प्रतिनिवृत्त इव अस्मि॥ ३१॥

प्रियंवदा—(शकुन्तलाम्, उपेत्य=उपगम्य) हला चण्डि!=अतिकोपने! गन्तुं=यातुं (इतोऽन्यत्र इति भावः), नार्हसि=नोपयुक्ताऽसि।

शकुन्तला—(परिवृत्त्य=सम्मुखीभूय, भ्रूभङ्गेन=भ्रूकौटिल्येन, सहितमिति सभ्रूभङ्गम्) इति=मम गमननिषेधः, किम्=कथं क्रियते इति? किं हेतुकं वा इति।

(जबकि मैं) शकुन्तला के पीछे जाने की तैयारी कर चुका था, सहसा शिष्टाचार ने रोक दिया। यद्यपि मैं अपने स्थान से नहीं हटा पर (ऐसा जान पड़ा मानो मेरा) मन उसके पीछे जाकर लौट आया हो॥ ३१॥

प्रियंवदा—(शकुन्तला के पास जाकर) री चण्डी! (क्रोधयुक्त) तू नहीं जा सकती।

शकुन्तला—(घूमकर भौंह चढ़ाकर)। क्यों नहीं जा सकती?

About to follow the sage's daughter suddenly, (but) with my advance stopped by the sense of propriety (decorum), (and) though not moving from my place, have as though gone and returned. (31)

Priyaṁvadā—(Approaching Śakuntalā) Dear furious one! you can not go from here.

Śakuntalā—(With the knitting of her eyebrow) why not? (what for?)

प्रियंवदा—दुवे मे रुक्खसेअणके धारेसि, तेहिं दाव अत्ताणं मोआवेहि, तदो गमिस्ससि। (इति बलान्निवर्त्तयति)। **[द्वे मे वृक्षसेचनके धारयसि, ताभ्यां तावदात्मानं मोचय; ततो गमिष्यसि।]**

राजा—भद्रे! वृक्षसेचनादेवात्रभवतीं परिश्रान्तां तर्कयामि। तथा ह्यस्याः—

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसा जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्द्धजाः॥ ३२॥

प्रियंवदा—मे=मह्यम्, द्वे वृक्षसेचनके=वृक्षं सिच्यते आभ्यामिति वृक्षसेचनके=जल-पूर्णघटौ, धारयसि=ऋणत्वेन धत्से, तथा च (पूर्वेद्युस्त्वया वारद्वयं वृक्षसेचनं मह्यं दातुमङ्गीकृत्य मत्तो गृहीतम्, तत् ते ऋणत्वेन जातम्), ताभ्याम्=ऋणबन्धभूताभ्यां वृक्षसेचनकाभ्याम्, आत्मानं मोचय=आत्मानं मुक्तं कुरु, ततः=तदा, गमिष्यसि=स्थानादस्मात् यास्यसि। (इति=एवं, बलात्, निवर्तयति= स्वस्थानं प्रापयति।)

राजा—भद्रे=कल्याणि प्रियंवदे! अत्रभवतीम्=(मुनिदुहितृत्वेन) पूज्यां शकुन्तलाम्, वृक्षसेचनात्=पादपजलसेकात्, एव परिश्रान्तां=पूर्णतः श्रमयुक्तां, तर्कयामि=लक्षयामि। तथाहि= तेनैव कारणेन, अस्याः=शकुन्तलायाः—

अन्वयः—बाहू घटोत्क्षेपणात् (हेतोः) स्रस्तांसौ, तथा अतिमात्रलोहिततलौ प्रमाणाधिकः श्वासः अद्यापि स्तनवेपथुं जनयति, तथा वदने घर्माम्भसा कर्णशिरीषरोधि जालकं बद्धम्, तथा बन्धे स्रंसिनि एकहस्तयमिताः मूर्द्धजाः च पर्य्याकुलाः॥ ३२॥

स्रस्तांसाविति। बाहू=भुजौ, घटानां=कुम्भानां (जलपूर्णानामित्यर्थः), उत्क्षेपणात्= उत्तोलनात् (जलसेचनाय इति भावः), हेतोः, स्रस्तौ=अवनतौ (भाराधिक्यात् इति भावः), अंसौ=स्कन्धसन्धिभागौ ययोस्तादृशौ, तथा, अतिमात्रम्=अत्यन्तं, लोहिते=रक्तवर्णे, तले=करतले, ययोस्तौ अतिमात्रलोहिततलौ (सम्प्रति परिश्रमातिरेकात् करतलम् अतिमात्रं रक्तवर्णं जातम्),

---

प्रियंवदा—तू मेरे दो वृक्ष सींचने की ऋणी है। पहले उस ऋण को उतार, तभी तू जा सकेगी।

राजा—भद्रे! मैं इन्हें (शकुन्तला को) वृक्ष सींचने से ही थकी हुई मानता हूँ; क्योंकि—

इसके (घड़ा उठाने से) दोनों कन्धे झुक गये हैं, दोनों हथेलियाँ लाल हो गई हैं, परिश्रम के कारण श्वास का वेग बढ़ जाने से दोनों स्तन काँप रहे हैं, पसीने की बूँदें मुख पर

***Priyaṁvadā*—You owe me two waterings of trees, so release yourself first, then only you can go.**

***King*—Good lady! I observe this lady is fatigued even with watering trees. For her—**

Arms, with the shoulders drooping, have their palms rendered excessively red through this hard work i.e. the lifting of the pitcher; even now her breathing, which is more than normal,

तदहमेनामनृणां करोमि। (इत्यङ्गुरीयकं ददाति।)

(सख्यौ प्रतिगृह्य नामाक्षराणि वाचयित्वा च परस्परमवलोकयत:।)

राजा—अलमन्यथा सम्भावनया, राज्ञ: प्रतिग्रहोऽयम्।

प्रमाणाधिक:=स्वाभाविकादधिक:, श्वास:=नि:श्वास:, अद्यापि=इदानीमपि (जलसेचनावसानेऽपि),स्तनयोर्वेपथुं=कम्पं, जनयति=उत्पादयति। तथा, वदने=मुखे, घर्माम्भसा=स्वेदवारिणा, कर्णशिरीषरोधि=कर्णभूषणभूते शिरीषकुसुमे रुणद्धि (सुकुमारतया स्वेदजललग्नतया च दोलनात् स्थगयति), जालकं=बिन्दुकदम्बकम्, बद्धं=धृतं, तथा, बन्धे= केशबन्धने, स्रंसिनि=स्खलिते सति (एकेन हस्तेन अपरस्य घटोद्वहने नियतत्वादिति भाव:), यमिता:=संयतीकृता:, मूर्द्धजा:=केशाश्च, पर्य्याकुला:=विक्षिप्ता:, स्थिता:। अत्र परिश्रान्तिसमर्थकबहुविधकारणानामभिहितत्वात् समुच्चयालङ्कार:, स्वभावोक्तिरिति केचित्। शार्दूलविक्रीडितं नाम वृत्तम्॥ ३२॥

भावार्थ:—अस्या: शकुन्तलाया: करद्वयं जलपूर्णकुम्भानां जलसेचनायोत्तोलनात् हेतो: स्रस्तांसौ, तथा परिश्रमातिरेकात् करतलम् अतिमात्रं रक्तवर्णं जातम्। स्वाभाविकादधिक: श्वास इदानीमपि स्तनवेपथुमुत्पादयति। (तथा) मुखमण्डले स्वेदवारिणा कर्णशिरीषरोधि बिन्दुकदम्बकं जनितम्। (तथा) केशबन्धने स्खलिते सति (एकेन हस्तेन) संयतीकृता: केशाश्च इतस्तत: विकीर्णा: (इति दृश्यन्ते)॥ ३२॥

तत्=तस्मात्, अहम्=दुष्यन्त:, एनाम्=शकुन्तलाम्, अनृणां=ऋणमुक्तां, करोमि। (इति= इत्युक्त्वा, अङ्गुरीयकं, ददाति=अर्पयति।)

(सख्यौ=अनसूया-प्रियंवदेति, प्रतिगृह्य=गृहीत्वा, नाम्न: अक्षराणि नामाक्षराणि= अङ्गुरीयाङ्कितान् दुष्यन्तस्य नामवर्णान्, वाचयित्वा=पठित्वा, च=एवं, परस्परम्=अन्योन्यं, अवलोकयत:=पश्यत: (कथमत्र स्वयं महाराजदुष्यन्त: समायात:)।

छाई हुई हैं और इसी से दोनों कानों के शिरीष कुसुम अवरुद्ध हो गये हैं। बन्धन छूट जाने से एक हाथ में सँभाले हुए केश भी अब इधर-उधर बिखर गये हैं॥ ३२॥

इसलिए मैं इन्हें ऋणमुक्त किये देता हूँ। **(अपनी अंगूठी देता है)**

(सखियाँ अंगूठी लेकर और उस पर अङ्कित नाम के अक्षरों को पढ़कर एक-दूसरी को देखती हैं।)

राजा—आप लोग और किसी प्रकार की सम्भावना न करें। यह मुझे राजा ने पारितोषिक रूप में दी थी।

---

causes tremor (thrill) in her breasts; on her face is formed a cluster of sweat drops, which obstructs (the movement of) the Śirīṣa flowers on her ears; and the braid (plaited hair) being loosened, her hair, restrained with one hand, are dishevelled. (32)

Therefore I shall make her free from debt. *(Saying this, gives his ring).*

(Both reading the letters on the ring with name and then look at each other)

प्रियंवदा—तेण हि णारिहदि एदं अंगुलीअं अंगुलीविओअं। अज्जस्स वअणादो ज्जेव अणिणा एसा भोदु। **[तेन हि नार्हति इदमङ्गुरीयकमङ्गुलीवियोगम्। आर्यस्य वचनादेव अनृणा एषा भवतु।]**

अनसूया—हला सउंतले! मोआविदासि अणुकंपिणा अज्जेण अहवा राएसिणा। ता कहिं दाणिं गमिस्ससि? **[हला शकुन्तले! मोचितासि अनुकम्पिना आर्येण, अथवा राजर्षिणा। तत् कस्मिन्निदानीं गमिष्यसि?]**

शकुन्तला—(आत्मगतम्) ण एदं जणं परिहरिस्सं, जई अत्तणो पहविस्सं। **[नैतं जनं पर्याहरिष्यम्, यद्यात्मनः प्राभविष्यम्।]**

राजा—अन्यथा सम्भावनया=मम नृपत्वसम्भावनया, अलम्=पर्याप्तम् (मम विषये अन्यथा सम्भावना न कार्या इति भावः), (इदं अङ्गुरीयकं तु), राज्ञः=दुष्यन्तात्, अयं, प्रतिग्रहः= आदानम् (राज्ञा दुष्यन्तेन स्वयं इदम् अङ्गुरीयकं मह्यं पारितोषिकं दत्तम्)।

प्रियंवदा—तेन हि=प्रतिगृहीतत्वेनैव कारणेन, अङ्गुलीवियोगं=भवदङ्गुलीविच्छेदं, नार्हति=कर्त्तुं युक्तं नास्ति। आर्य्यस्य=भवतः, वचनादेव=कथनमात्रेणैव, एषा=शकुन्तला, अनृणा= ऋणमुक्ता, भवतु।

अनसूया—हला शकुन्तले! अनुकम्पिना=दयालुना, आर्येण=मान्येन, अमुना राजर्षिधर्म-सचिवेन, अथवा राजर्षिणा=स्वयं दुष्यन्तेन, मोचितासि=अनृणीकृतासि। तत्=तस्मात्, कस्मिन्= कस्मिन् स्थाने, इदानीम्=अधुना, गमिष्यसि?

शकुन्तला—(आत्मगतम्) एतं जनं=राजानम्, न पर्य्यहरिष्यम्=न पर्य्यत्यक्षम्, यदि आत्मनः=स्वस्य, प्राभविष्यम्=प्रभुः अधिकारिणी अभविष्यम् (यद्यहं पितुरधीना नाऽभविष्यम्, तर्ह्येनमेव पतित्वेनावरिष्यमिति भावः)।

प्रियंवदा—(सम्भवतः) इसीलिए इस अँगूठी का आपकी उँगली से बिछुड़ना ठीक नहीं। आपके कथन मात्र से ही यह ऋणमुक्त हो जाय। अर्थात् इस अँगूठी को देने की आवश्यकता नहीं, आपके कहने मात्र से मैं इसे ऋणमुक्त किये देती हूँ।

अनसूया—सखी शकुन्तला! दयालु अथवा राजर्षि ने तुम्हें ऋणमुक्त कर दिया। तो बताओ अब कहाँ जाओगी?

शकुन्तला—**(मन में)** यदि मैं पिता के अधीन न होती तो इसे निश्चय ही पति रूप में वर लेती।

King—Enough of thinking otherwise of me. This is a gift (prize) from the king.

Priyaṁvadā—That's why this ring deserves not separation from your finger. By your honour's words she is now free from debt.

Anasūyā—Dear Śakuntalā! You have been freed by this gentleman who takes pity on you, or by the king himself. So, let me know where do you want to go now?

Śakuntalā—*(To herself)* If I am mistress of myself, then surely I will marry this honourable one.

प्रियंवदा—किं दाणिं ण गच्छीअदि ? **[किमिदानीं न गम्यते ?]**

शकुन्तला—दाणिं किं तुह आअत्तम्हि ? जदो मे रोअदि, तदो गमिस्सं। **[इदानीं किं तव आयत्तास्मि ? यतो मे रोचते, ततो गमिष्यामि।]**

राजा—(शकुन्तलां विलोकयन्नात्मगतम्) किं खलु यथा वयमस्यामियमपि अस्मान् प्रति तथा स्यात् ? अथवा लब्धावकाशा मे मनोवृत्तिः। कुतः—

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः॥ ३३॥

प्रियंवदा—सकौतुकमाह किमिदानीं=अधुना, न गम्यते ?

शकुन्तला—इदानीम्=अधुना, किं, तव, आयत्ता=आधीना अस्मि, यतः=यस्मिन् स्थाने काले वा, मे=मह्यं, रोचते, ततः=तस्मिन् काले, गमिष्यामि=व्रजिष्यामि।

राजा—(शकुन्तलां विलोकयन्=पश्यन्, आत्मगतम्=स्वमनसि) किं खलु=इत्येताभ्यां वितर्कगर्भप्रश्नो द्योत्यते। अस्यां शकुन्तलायाम्, यथा=येन प्रकारेण, वयम्=अहम् (अनुरक्तोऽस्मि) (किं तथैव), इयमपि=शकुन्तलापि, तथा=तेनैव रूपेण, अस्मान् प्रति=मां प्रति, स्यात्=भवेत् ? अथवा मे=मम, मनोवृत्तिः=निश्चयात्मिका मनोवृत्तिः, लब्धावकाशा=प्राप्तविषयद्वारा वर्तते। (मम निश्चयरूपा प्रवृत्तिः शकुन्तलागतानुरागरूपविषयस्पर्शं द्वारं प्राप इति भावः।) कुतः=यद्यपि—

अन्वयः—इयं मद्वचोभिः वाचं न मिश्रयति तथापि मयि भाषमाणे अवहितां कर्णं ददाति। (एवं यद्यपि) मदाननस्य सम्मुखी कामं न तिष्ठति तथापि तु अस्याः दृष्टिः भूयिष्ठम् अन्यविषया न॥ ३३॥

वाचमिति। इयं=शकुन्तला, मद्वचोभिः=ममोक्तिभिः सह, वाचं=निजकथनम् (उक्तिं), न मिश्रयति=न सम्मेलयति (मया सह नालपति), (तथापि) मयि=दुष्यन्ते, भाषमाणे=यत्किञ्चित्

प्रियंवदा—अब क्यों नहीं जा रही हो ?

शकुन्तला—क्या मैं तुम्हारे अधीन हूँ ? जब मेरी इच्छा हागी तब जाऊँगी।

राजा—**(शकुन्तला को देखते हुए मन में)** क्या जैसे मैं इसमें अनुरक्त हूँ वैसे ही यह भी मुझमें अनुरक्त होगी ? अथवा मेरी मनोवृत्ति को यह अवसर मिल गया है। क्योंकि—

***Priyaṁvadā*—Why are you not going now?**

***Śakuntalā*—Am I under your control now? When ever I like, I will go.**

***King—(Looking at Śakuntalā; to himself)* May it indeed be that as we are (disposed) towards her, so she also is towards us? or my thought has found scope.**

How? though she mingles not her speech with my words, (but) she directs her ear towards me when I speak; granted that she

(नेपथ्ये) भो भोस्तपस्विनः! तपोवनसन्निहितसत्त्वरक्षणाय सज्जीभवन्तु भवन्तः, प्रत्यासन्नः किल मृगयाविहारी राजा दुष्यन्तः।

तुरगखुरहतस्तथाहि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु॥ ३४॥

कथयति सति, अवहिता=दत्तावधाना (मदुक्तौ इति शेषः) सती, कर्णं ददाति=निक्षिपति (मदुक्तिं सावधानतया शृणोति), एवं यद्यपि, मदाननस्य=मन्मुखस्य, सम्मुखी=अभिमुखी सती, कामं= पर्याप्तम्, न तिष्ठति=न आश्रयते, (तथापि) तु=किन्तु, अस्याः=शकुन्तलायाः, दृष्टिः=दृक्, भूयिष्ठम्=अतिशयेन (प्रायशः), अन्यः=मद्भिन्नः, विषयः=लक्ष्यः, यस्याः सा अन्यविषया, न=नैव। अत्र समुच्चयालङ्कारः, वसन्ततिलकं वृत्तम्॥ ३३॥

भावार्थः—यद्यपि इयं शकुन्तला मया सह नालपति तथापि मदुक्तिं सावधानतया शृणोति। एवमेव यद्यपि मन्मुखाग्रे (पुरतः) पर्याप्तं न तिष्ठति तथापि अस्याः दृष्टिः प्रायश अन्यविषया (मद्भिन्नलक्ष्यमधिकृत्य) न प्रवर्तते॥ ३३॥

(नेपथ्ये=परोक्षे, यवनिकामध्ये इति भावः) भो भोः=इति सम्भ्रमे द्विरुक्तिः, तपोवन-सन्निहितानाम्=आश्रमपार्श्वभागे अवस्थितानाम्, सत्त्वानां=जन्तूनाम्, रक्षणाय=रक्षार्थम्, भवन्तः= यूयम्, असज्जाः सज्जा भवन्तु इति सज्जीभवन्तु=उद्युक्ताः भवन्तु, प्रत्यासन्नः=सन्निहितः, किलेति सम्भावनायां, मृग्यन्ते जन्तवो यस्यां क्रियायां सा मृगया=पशुहिंसा, तस्यै विहरति=विचरति, इति मृगयाविहारी राजा दुष्यन्तः।

अन्वयः—तथाहि तुरगखुरहतः परिणतारुणप्रकाशः रेणुः शलभसमूह इव विटपविषक्त-जलार्द्रवल्कलेषु आश्रमद्रुमेषु पतति॥ ३४॥

यद्यपि जिस समय मैं बात करता हूँ तब यह उस वार्तालाप में भाग नहीं लेती, तथापि सावधान होकर मेरा कथन सुनती है। इसी प्रकार यद्यपि यह शकुन्तला मेरे मुँह के सामने नहीं बैठती तथापि इसकी दृष्टि अन्यत्र नहीं भटकती (अर्थात् मेरी ओर ही रहती है)॥ ३३॥

(नेपथ्य में)—हे हे तपस्वियो! तपोवन के आस-पास रहने वाले जीवों की रक्षा करने के लिए तैयार हो जाओ; क्योंकि आखेट के लिए निकला हुआ राजा दुष्यन्त निकट ही है।

(देखिये) घोड़ों के खुरों से उड़ी हुई अस्ताचलगामी सूर्य के प्रकाश की भाँति रक्तिम धूलि शलभ (टिड्डी) समूह की भाँति वृक्षों की शाखाओं पर सूखने के लिए लटकाये गये वल्कलों वाले आश्रम के वृक्षों पर गिर रही है॥ ३४॥

---

does not stand with her face (turned) towards my face, yet her eye for the most part does not possess any other object. (33)

(Behind the scene) O' O' Ascetics! be alert for the protection of the animals of the penance grove. King Dushyanta, amusing himself with the chase, is reported to be hard by (very near).

For, the dust, struck up by the hoofs of horses and having the colour of the evening twilight, descends like a swarm of locusts (insect) on the trees of the hermitage, that wear bark garments, wet with water, suspended from their branches. (34)

राजा—(स्वगतम्) अहो धिक्! ममान्वेषिणः सैनिकास्तपोवनमभिरुन्धन्ति।

(पुनर्नेपथ्ये) भो भोस्तपस्विनः! पर्याकुलयन् वृद्धस्त्रीकुमारान् एष गजः प्राप्तः—

तीव्राघातादभिमुखतरुस्कन्धभग्नैकदन्तः
प्रौढाकृष्टव्रततिवलयासङ्गनाज्जातपाशः ।
मूर्त्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं विरुजति गजः स्यन्दनालोकभीतः॥ ३५॥

तुरगेति। तथा हि=यतः, तुरगाणाम्=अश्वानां, खुरैर्हतः=क्षुण्णः, तुरगखुरहतः, परिणतः= अस्तमयोन्मुखः, यः अरुणः=सूर्यः, तस्य प्रकाश इव प्रकाशो यस्य सः परिणतारुणप्रकाशः=पाटल- वर्णः, रेणुः=धूलिः, शलभानां=पतङ्गानां, समूहः=वृन्दम्, इव, विटपेषु=वृक्षशाखासु, विषक्तानि= विलम्बितानि, जलार्द्राणि वल्कलानि=वृक्षत्वचः, येषां तेषु विटपविषक्तजलार्द्रवल्कलेषु, आश्रमद्रुमेषु=तपोवनवृक्षेषु, पतति। अत्र परिणतारुणप्रकाशेन लुप्तोपमा, शलभसमूह इव इत्यनेन श्रौतोपमा तथा अनयोः परस्परनैरपेक्ष्येण संसृष्टि अलङ्कारः, पुष्पिताग्रा नाम वृत्तम्॥ ३४॥

भावार्थः—मृगयाविहारिणो राज्ञः दुष्यन्तस्य पार्श्ववर्त्तित्वं सूचयन् चिह्नानि निर्दिशन् कथयति कश्चित्तापसः—पश्यन्तु भवन्तः। यत् तुरगखुरहननेनोत्क्षिप्तः, सन्ध्याकाले अस्तमनवेलायां सूर्यस्य प्रकाश इव पाटलवर्णः धूलिः शलभसमूह इव विटपविलम्बितजलार्द्रवल्कलेषु आश्रमस्थ- वृक्षेषु पतति, सूचयति च राज्ञः सान्निध्यम्॥ ३४॥

राजा—(स्वगतम्) अहो=इति विस्मये, धिक्=इति निन्दायाम्, मम=दुष्यन्तस्य, अन्वेषिणः=अनुसन्धित्सवः, सैनिकाः, तपोवनम्=आश्रमम्, अभिरुन्धन्ति=समन्तात् परिवेष्ट्य पीडयन्ति।

(पुनर्नेपथ्ये=भूयः यवनिकामध्ये) भो भोस्तपस्विनः! पर्य्याकुलयन्=भयेन व्यस्ती-कुर्वन्, वृद्धान्=जठरान्, स्त्रीकुमारान्=बालकांश्च, एष गजः, प्राप्तः=उपागतः।

राजा—(मन में) अरे, धिक्कार है। जान पड़ता है, मुझे खोजने वाले सैनिकों ने इस तपोवन को घेर लिया है।

(फिर नेपथ्य में) हे हे तपस्वियो! बूढ़े, स्त्री तथा बालकों को भयाकुल बनाता हुआ यह हाथी आ पहुँचा है।

(और भी) सामने के वृक्ष के तने पर तीव्र प्रहार करने से जिसका एक दाँत टूट गया है, लताओं का समूह लिपटजाने के कारण जिसके लिए बन्धन-सा बन गया है, जिसने सहसा

King—(To himself) Oh! what a pity. It seems, that the soldiers, who are engaged to find me out, have surrounded (encompassed) the penance grove.

(Again behind the scene) O' Ascetics! frightening the aged people, women and children, this wild (furious) elephant has arrived.

(More over) An elephant, one of whose tusks is struck in the trunk of a tree, that has been struck back with a violent blow, who

(सर्वाः श्रुत्वा ससम्भ्रममुत्तिष्ठन्ति।)

राजा—(स्वगतम्) अहो धिक्! कथमपराद्धस्तपस्विनामस्मि। भवतु, प्रतिगच्छामि तावत्।

अन्वयः—तीव्राघातात् अभिमुखतरुस्कन्धभग्नैकदन्तः प्रौढाकृष्टव्रततिवलयासञ्जनात् जातपाशः भिन्नसारङ्गयूथः स्यन्दनालोकभीतः गजः मूर्त्तः तपसः विघ्न इव नः धर्म्मारण्यं विरुजति॥ ३५॥

तीव्राघातादिति। तीव्राघातात्=प्रखरप्रहारात्, अभिमुखस्य=सम्मुखस्थस्य, तरोः=वृक्षस्य, स्कन्धे=प्रकाण्डे, भग्नः, एको दन्तो यस्य सः अभिमुखतरुस्कन्धभग्नैकदन्तः, प्रौढम्=अत्यन्तं (प्रवृद्धं), यथा स्यात्तथा आकृष्टस्य=आक्षिप्तस्य उत आकर्षितस्य, व्रततिवलयस्य=लतामण्डलस्य, आसञ्जनात्=परिवेष्टनात्, जातः पाशः=बन्धनं, यस्य सः जातपाशः, भिन्नं=भयोत्पादनात् पृथक् कृतम्, सारङ्गानां=हरिणानां, यूथं=कुलं, येन सः भिन्नसारङ्गयूथः, स्यन्दनस्य=रथस्य, आलोकेन= दर्शनेन, भीतः=त्रस्तः, स्यन्दनालोकभीतः, गजः=हस्ती, मूर्त्तः=शरीरधारी, तपसः=धर्मकर्मणः, विघ्न इव, नः=अस्माकम्, धर्म्मारण्यं=तपोवनं, विरुजति=पीडयति। अत्र उत्प्रेक्षालङ्कारः; मन्दाक्रान्ता वृत्तम्।

भावार्थः—प्रखरप्रहारात् अभिमुखतरोः प्रकाण्डे भग्न एको दन्तो यस्य, एव प्रौढाकृष्ट-लतामण्डलस्य परिवेष्टनात् जातपाशः, भीत्युत्पादनात् भिन्नसारङ्गयूथः, रथालोकेन त्रस्त एष गजः धर्मकर्मभङ्गकरणात् शरीरधारी तपसः विघ्न इव अस्माकं धर्मारण्यं परिपीडयति॥ ३५॥

(सर्वाः श्रुत्वा=आकर्ण्य, ससम्भ्रमम्=सभयम्, उत्तिष्ठन्ति।)

राजा—(स्वगतम्) अहो=इति विषादे, धिक् मामिति शेषः, तपस्विनाम् अपराद्धः= कृतापराधोऽस्मि। भवतु=तदपराध इति शेषः, तावत्, प्रतिगच्छामि=सैन्यानां समीपमेव प्रतिगच्छामि (तपोवनावरोधात्तान्निषेद्धुङ्गजं निवारयितुं च इत्याशयः)।

उपस्थित होकर मृगों के झुण्ड को तितर-बितर कर दिया है तथा रथ को देखक. . जो भयभीत है; धर्माचरण में मूर्त्तिमान् विघ्न के सम.ान (ऐसा) वह हाथी हमारे तपोवन को बहुत कष्ट (हानि) पहुँचा रहा है॥ ३५॥

(सब सुनकर, परेशान होकर उठ खड़ी होती हैं।)

राजा—मुझे धिक्कार है। क्या मैं तपस्वियों की दृष्टि में अपराधी बन गया? अच्छा, तब तक जाकर देखूँ।

---

has a letter formed by the clinging of the coils of creepers dragged along his feet, who is as though an incarnate obstacle to our penance and has dispersed, herds of deer, is entering in this sacred grove, being frightened at the sight of a chariot.

(All stand with hurry after hearing this.)

King—*(To himself)* Oh, what a pity! Am I became a guilty in the sight of these ascetics? Well! we shall just go back.

सख्यौ—महाभाअ! इमिणा हत्थिसंभमेण पज्जाउला म्ह। ता अणुजाणीहि णो उडअगमणे। [**महाभाग! अनेन हस्तिसम्भ्रमेण पर्याकुलाः स्मः। तदनुजानीहि न उटजगमने।**]

अनसूया—(शकुन्तलां प्रति) हला सउंतले! पज्जाउला अज्जा गोदमी भविस्सदि, ता एहि सीग्घं एकत्था होम्ह। [**हला शकुन्तले! पर्याकुला आर्या गौतमी भविष्यति, तदेहि शीघ्रमेकस्था भवामः।**]

शकुन्तला—(गतिरोधं रूपयित्वा) हद्दी! हद्दी! उरुत्थंबविब्भलम्हि संवुत्ता। [**हा धिक्! हा धिक्! ऊरुस्तम्भविह्वलाऽस्मि संवृत्ता।**]

राजा—स्वैरं स्वैरं गच्छन्तु भवत्यः। आश्रमबाधा यथा न भवति, तथाहमपि यतिष्ये।

सख्यौ—महाभाग=महोदय! अनेन, हस्तिसम्भ्रमेण=करिसंवेगेन, पर्य्याकुलाः= अति-सन्त्रस्ताः स्मः। तत्=तस्मात्, नः=अस्मान्, उटजगमने=पर्णशालागमने, अनुजानीहि=अनुमन्यस्व (आज्ञां देहीति भावः)।

अनसूया—(शकुन्तलां प्रति) हला शकुन्तले! आर्य्या=मान्या, गौतमी, पर्य्याकुला= व्याकुला, भविष्यति, तत्=तस्मात्, एहि=आगच्छ, एकस्थाः=मिलिताः, भवामः।

शकुन्तला—(गतिरोधं=गमनप्रतिबन्धम्, रूपयित्वा=नाटयित्वा) हा धिक्! हा धिक्! इति भर्त्सने, ऊर्वोः स्तम्भेन=रक्तसञ्चाराभावे ऊर्वोः स्थैर्येण, विह्वला=विकला, विवशा, संवृत्ताऽस्मि=जातास्मि।

राजा—स्वैरं स्वैरं=मन्दं मन्दं, गच्छन्तु भवत्यः (अतित्वरयालम् इति भावः)। यथा=येन प्रकारेण, आश्रमबाधा=आश्रमोपद्रवः, न भवति, तथा=तेनैव प्रकारेण, अहमपि, यतिष्ये=यत्नं करिष्ये।

दोनों सखियाँ—महाभाग! इस हाथी के भय से हम सब घबरा गई हैं, अतः अब आप हमें अपनी कुटिया में जाने की आज्ञा दें।

अनसूया—(**शकुन्तला से**) सखी शकुन्तला! आर्या गौतमी (इस उपद्रव के समय हमें पास न देखकर) व्याकुल हो रही होंगी, अतः आओ हम लोग शीघ्र एकत्रित हो जायें।

शकुन्तला—(**गतिरोध=(अचानक रुकने) का अभिनय करती हुई**) हाय! हाय! पाँव के सो जाने से (ऊरुस्तम्भ से) मैं विह्वल हो गई हूँ (मुझसे चला ही नहीं जाता)।

राजा—आप लोग धीरे-धीरे जायें। आश्रम को (और आश्रमवासियों को) जिससे किसी प्रकार की हानि न पहुँचे मैं वही यत्न करूँगा।

Friends—Noble sir! we feel greatly perturbed by this report about the wild elephant. Please permit us to go to the hermitage.

Anasūyā—*(Towards Śakuntalā)* Dear Śakuntalā! Respected Gauttami will be frightened in our absence, so come quickly and let us get in one place.

Śakuntalā—*(Acting stoppage)* Oh, what a pity, due to a cramped leg, I became frightened to see (also unable to walk).

King—Let your ladyships go slowly. I shall try that no trouble will happen to the hermitage.

सख्यौ—महाभाअ! विदिदभूइट्ठोसि। संपदं उवआरमज्झत्थदाए अवरद्ध म्ह; तं मरिसेहि, असंभाविदसक्कारं भूओ बि पच्चवेक्खणणिमत्तं अज्जं विण्णवेह्य। [**महाभाग! विदितभूयिष्ठोऽसि। साम्प्रतमुपचारमध्यस्थतया अपराद्धाः स्मः; तन्मर्षय, असम्भावितसत्कारं भूयोऽपि प्रत्यवेक्षणनिमित्तमार्यं विज्ञापयामः।**]

राजा—मा मैवम्। दर्शनेनैव भवतीनां सम्भूतसत्कारोऽस्मि।

शकुन्तला—हला अणसूए! अहिणवकुससूइपरिक्खदं मे चलणं कुरुव-असाहा-परिलग्गं च वक्कलं, दाव परिवालेध मं, जाव णं मोआवेमि। (इति राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता।) [**हला अनसूये! अभिनव-कुश-सूचिपरिक्षतं मे चरणम्, कुरुबक-शाखापरिलग्नञ्च वल्कलम्। तावत् प्रतिपालयतं माम्, यावदेनं मोचयामि।**]

सख्यौ—महाभाग!—महान् भागः=भाग्यं, यस्य सः तत्सम्बोधने महाभाग! विदितं=परिज्ञातं, भूयिष्ठं=बहुलं (अस्माकमाचारेङ्गितादि), येन सः विदितभूयिष्ठोऽसि। साम्प्रतम्=इदानीम्, उपचारेषु=भवतः सत्कारेषु, मध्यस्थतया=उदासीनतया, उपचारमध्यस्थतया, अपराद्धाः=अपराधवत्यः, स्मः=भवामः (वयमिति शेषः, तत्=तदपराधं, मर्षय=क्षमस्व, असम्भावितः=अस्माभिरनाचरितः, सत्कारः यस्य सः, तम् असम्भावितसत्कारं, आर्य्यम्, भूयोऽपि=पुनरपि, प्रत्यवेक्षणनिमित्तं=दर्शनार्थम्, विज्ञापयामः=निवेदयामः (अस्मभ्यं दर्शनं दातुं तथा अस्मदीयसत्कारं ग्रहीतुं भवतां पुनरप्यत्रागमनं प्रार्थयाम)।

राजा—एवम्=उपरोक्तसम्भावितसत्कारत्वम्, मा मा=नहि नहि (सम्भ्रमे द्विरुक्तिः), भवतीनां दर्शनेनैव, सम्भूतसत्कारः=सञ्जातसपर्यः, अस्मि (भवतीनां दर्शनेनैव कृतकृत्योऽस्मि, मन्ये च सम्भूतसत्कार इवात्मानम्)।

शकुन्तला—हला अनसूये! अभिनवया कुशस्य सूच्या=शिखया, परिक्षतं=विद्धम्, अभिनवकुशसूचिपरिक्षतं, मम चरणं=पादम्, वल्कलञ्च=तरुत्वक् च, कुरुबकस्य=वृक्षविशेषस्य, शाखायां परिलग्नम्=संलग्नम् (मम वस्त्रभूतं वल्कलञ्च ससम्भ्रमगामित्वेनासावधानतया कुरुबक-वृक्षस्य शाखायां परिलग्नम्), तावत्, प्रतिपालयतम्=प्रतीक्षेथाम्, माम्=शकुन्तलाम्, यावद्=

दोनों सखियाँ—महाभाग! आप तो बहुत कुछ जानते ही हैं। इस समय आपकी सेवा से पराङ्मुख होने के कारण हम अपराधिनी हैं, अतः क्षमा करें। हमने अभी आपका सत्कार नहीं किया अतः पुनः दर्शन देने के लिए आर्य से प्रार्थना करती हैं।

राजा—ऐसा नहीं, ऐसा नहीं। आप लोगों के दर्शन से ही मेरा (पर्याप्त) सत्कार हो गया है।

शकुन्तला—सखी अनसूया! नवीन कुश का काँटा गड़ने से मेरे पाँव में घाव हो गया

Friends—Noble sir! not having rendered hospitality due to guests, we feel ourselves guilty. Please excuse us. We request your honour for the purpose of an interview again.

King—No, not so! even by your sight I am honoured.

राजा—(निःश्वस्य) गताः सर्वाः। भवतु, अहमपि गच्छामि, शकुन्तलादर्शनादेव मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकानतिदूरे तपोवनस्य निवेशयामि। न खलु शक्तोऽस्मि शकुन्तलादर्शनव्यापारादात्मानं निवर्त्तयितुम्। मम हि—

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥ ३६॥

(इति निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः।

यावत्कालपर्यन्तम्, एनं=वल्कलं, मोचयामि। (इति=इत्थं, राजानम्=दुष्यन्तम्, अवलोकयन्ती=पश्यन्ती, सव्याजं=सकपटम्, विलम्ब्य=विलम्बं कृत्वा, सहसखीभ्याम्=अनसूया-प्रियंवदाभ्यां सह, निष्क्रान्ता=निर्गता।)

राजा—(निःश्वस्य=दीर्घनिःश्वासं त्यक्त्वा) गताः सर्वाः। भवतु=गमनं निवार्यासां रक्षणोपाय एव न दृश्यते इति भावः, अहमपि गच्छामि (इहोपस्थितेः निष्फलत्वादिति भावः)। शकुन्तलादर्शनादेव=अवलोकनादेव, मन्दं=स्वल्पीकृतम्, औत्सुक्यम्=उत्साहः, यस्य मन्दौत्सुक्यः, अस्मि, नगरगमनं प्रति=राजधानीं प्रति (राजधानीं प्रति यातुम् उत्साहो मे मन्दीभूतः), यावत्=सर्वान्, अनुयात्रिकान्=अनुगामिनः सैनिकान्, तपोवनस्य अतिदूरे=दूरस्थप्रदेशे, निवेशयामि=स्थापयामि। खलु=निश्चयेन, आत्मानं=हृदयं, शकुन्तलायाः दर्शनव्यापारात्=दर्शनकार्यात्, निवर्तयितुम्=समाक्रष्टुं, न=नहि, शक्तः=समर्थः अस्मि (अनुरागावर्तनस्य दुर्निवार्य्यत्वात् इति शेषः)। कथम्? इति प्रश्ने, तत्र हेतुमाह—मम हीति।

अन्वयः—मम शरीरं पुरः गच्छति किन्तु प्रतिवातं नीयमानस्य केतोः चीनांशुकमिव असंस्थितं चेतः पश्चात् धावति॥ ३६॥

है और इस कुरबक वृक्ष की शाखा में मेरा वल्कल वस्त्र भी उलझ गया है। अतः थोड़ी देर मेरी प्रतीक्षा करो, जिससे मैं इसे छुड़ा लूँ।

(इस प्रकार राजा को देखती हुई, बहाने से विलम्ब कर सखियों के साथ चली जाती है।)

राजा—**(साँस भरकर)** सब गईं। अच्छा तो मैं भी जाता हूँ। शकुन्तला के देखने मात्र से ही मेरी नगर लौटने की इच्छा मन्द पड़ गई है। तब तक अपने पीछे आने वाले यात्रियों

---

point of a young Kusha-thorn and my bark is stuck to a Kurabaka-branch. Wait for me so long as I extricate it.

(Looking at the king and delaying under pretext exit along with friends)

King—(With a sigh) All have gone. Well, I too go then. I am slackened in my eagerness to go to the city. Meanwhile having joined my followers I shall encamp them far from the penance grove. Indeed I am not able to bring back myself from occupying